

…जुरापशास्त्री विद्यासागरः ।

* अथ *

दुर्गाभ्युदयनाटकम् ।

संकेतसहितम् ।

या सम्यग् विधिविधुशङ्करैर्नबुद्धा
शुद्धान्तःकरणविशिष्टभक्तवेद्या ।
सानन्दं विहरति या गृहे मणीनां
भव्यार्थं भवतु ममाद्य साऽत्र देवी ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य)

गणाधीशं नमस्कृत्य मामकी-मोत्तरामकौ ।
भूलया-मूलचन्द्रं च कुञ्जूराम-सभक्तिकम् ॥ १ ॥

वेदवेदाङ्गविदुषः सर्वशास्त्रार्थवादिनः ।
विद्याब्धिकविरत्नाङ्कश्रीकुञ्जूरामशास्त्रिणः ॥ २ ॥

शुभाज्ञयातत्कनिष्ठभ्रातरौतस्यनाटके ।
नेकीरामरामकृष्णौ 'संकेतं' कुरुतो युतौ ॥ ३ ॥

अथ—प्रारिप्सितस्य दुर्गाभ्युदयनाटकस्य निर्विघ्नपरिसमाप्तिकामनयास्वेष्टदेवतास्मरणरूपं मङ्गलं नान्द्या निबध्नाति—**येति** ।

मारिष, इतस्तावत् ।

पारिपार्श्वकः—भाव, अयमस्मि ।

सूत्र०—मारिष,

एषा—सकलगुणप्राज्या, विद्वत्समज्या, पूर्ववर्तिनां लब्धकीर्तीनां कवीनां दृष्टरसप्रबन्धापि निबन्धान्तरं द्रष्टुमना मनागपि न विलम्बयति ।

तदयमहमधुना—पवित्रकुरुक्षेत्रमध्ये-शेखुपुरालावलाग्रामजन्मना, बिटोलीग्राम-वासिना, भगवदत्रिगोत्रीयलब्धप्रशंसेन, गौड़वंशावतंसेन,

---

या देवी **विधि** र्विधाता ब्रह्मेतियावत । **विधु** र्विष्णुः । विश्वम्भरः कैटभजिद्विधुरिति विष्णुनामस्वमरः । **शङ्करो** महेशस्तैः सम्यक् साकल्येनेत्यर्थः । नैवपरिज्ञाता । केवलंतु—**शुद्धचित्तवृत्तिभक्तैर्वेद्या** । **नवबुद्धा मणिगृहेविहरति** । **याच सानन्दं** सालोकवेदप्रसिद्धाद्य**देवी मम** ग्रन्थकर्तुः श्रोतुर्वक्तुश्च तथा **भव्यार्थं** कल्याणाय, **भवत्विति** प्रार्थनेलोट् । नान्दीश्लोकत्वादस्यादौमगणः । क्षेमं सर्वगुरुर्दत्ते मगणो भूमिदैवतइति भामहोक्तेः । नन्दयतिदेवानितिनान्दीरङ्गविघ्नोपशान्तये नटैः क्रियमाणोमङ्गलाचरणविशेषः । **नान्द्यन्तइति** ।

सूत्रेति । सूत्रधारलक्षणमुक्तं भरते—'नाट्यस्ययदनुष्ठानं तत्सूत्रंस्यात्सबीजकम् । रङ्गदैवतपूजाकृत्सूत्रधार उदीरितः ॥ नेपथ्याभिमुखमिति । **नेपथ्यं** रङ्गभूमिः । **मारिषोनटः** । नटः सूत्रधारेणमारिषइतिवाच्यः । 'सूत्री नटेनभावेति तेनासौमारिषेतिच' इत्युक्तत्वात् । **पारिपार्श्वकइति** । तल्लक्षणमपिचभरते— 'सूत्रधारस्यपार्श्वेयः प्रवचन् कुरुतेऽर्थनाम् । काव्यार्थसूचनालापं सभवेत्पारिपार्श्वकः ॥ **सकल**गुणै बहुला **विद्वत्समज्या**—विद्वत्सभा ... । **मना**गल्पमपि, **न विलम्बयति** ।

पण्डितमोत्तरामतनूजेन, सतीमासकीदेवीगर्भजेन, कर्मकाण्डमहोपाध्यायपण्डितमूलचन्द्रानुजेन, पण्डितनेकीराम—पण्डितरामकृष्णभट्टाग्रजेन, संपादितसकलनित्यक्रियेण, श्रीमतीभक्तिदेवीप्रियेण, विद्यासागर-पदालंकृतेन, पण्डित-छज्जूराम-शास्त्रिणा, कविरत्नेन, राजदयोपनत-हृदयोपेत-मुनिनोपश्रावितं दुर्गाचरित्र माश्रित्य ग्रथितं दुर्गाभ्युदयं नाम नाटक मादायोपतिष्ठे।

पारि०—भाव, किमपिशङ्के।

सूत्र०—कानाम शङ्का।

पारि० सकविः तार्किकोपि श्रूयते, कवित्वतार्किकत्वयोश्च प्रायो वैय्यधिकरण्यमालोक्यते।

सूत्र० मारिष, न विशिष्टयुक्तिमती भवदुक्तिः।

यतः—कर्कशे तर्कविषये कोमले काव्यवस्तुनि।
समं लीलायते तस्य छज्जूरामस्य भारती ॥२॥

अत्रहि।

अगाधेतार्किकत्वेऽपि कवितावाग्विलासिनौ।
यशस्विनौ हर्षमिश्र-जयदेवौ, निदर्शनम् ॥ ३ ॥

किंचास्यकवेरियंप्रसिद्धिः—

छज्जूरामकृतौनैकः सश्लोकः परिदृश्यते।
अल्पानल्पार्थवाकाचिद्यत्रनैव चमत्कृतिः ॥ ४ ॥

"पांसवोपि कुरुक्षेत्रेवायुनासमुदीरिताः। अपिदुष्कृतकर्माणंनयन्ति परमां गतिम् ॥ इत्या दिवाक्यप्रमाणादाह। **पवित्रकुरुक्षेत्रेति। रिटोलीग्रामेति**। अयं ग्रामः **करनाल** प्रान्ते लगति। **जींद**नगरात्पूर्वभागे द्वादशक्रोशे वर्तते।
शङ्के तर्कयामि, **प्रायो** बाहुल्येन, प्रायो वयसि बाहुल्ये इति वैजयन्ती। **कर्कशे** कठिने **तस्य** सिद्धान्तमुक्तावलीटीका-मूलचन्द्रिका, न्यायभाष्यप्रदीप, साहित्यबिन्दु, संस्कृतसाहित्योपाख्यान, प्रभृतिग्रन्थकर्तृत्वेन प्रसिद्धस्य, भारती-सरस्वती, प्रतिभेतियावत्।

अनुप्रासिनिसंदर्भे छज्जूरामसमोऽग्रकः ।
पुराप्यासन्न चेदासन् द्वित्रा एव कवीश्वराः ॥५॥

पारि०—भाव, किमपि वस्तु प्रस्तुतयुक्तिं विना न प्रेक्षावद्भिरपेक्षणीयं भवति विशेषतो नूतनविज्ञानोन्मीलितलोचनैर्मादृशजनैरिति दृढतरयुक्तिं विना नाहं तव वचसि श्रद्दधे ।

सूत्र०— शृणु ।

अनल्पमृदुभिस्तल्पमस्तुवस्त्रैरलंकृतम् ।
दर्भास्तृतं भूतलं वा सत्याः पत्यौ रतिः समा ॥ ६॥

किंच—

याभ्यामालिंग्यते कान्ता, कराभ्यामतिकोमला ।
ताभ्यामेवातिकठिनानारोप्यन्ते शराः किमु ॥ ७ ॥

पारि० भाव, युक्तमुक्तं भवता । राजदयोपनतहृदयोपेतमुनिनोपश्रावितमिति वृत्तान्तः कौतुकं मे कन्दलयति ।

हर्षमिश्रो नैषधमहाकाव्य-खाद्यखण्डनादिकर्ता ॥ **जयदेवः** तत्वचिन्तामण्यालोक, प्रसन्नराघवनाटक, चन्द्रालोक, प्रभृतिग्रन्थकर्ता, **कृतौ**—काव्येनाटकेच, **चमत्कृति** रानन्दविशेषः । **पुरा** प्रागपि, नासन्ना भूवन् **संदर्भे** गद्यपद्येवा । **प्रेक्षावदपेक्षणीयं** विद्वन्सान्यम् **श्रद्दधे**-श्रद्धांकुर्वे । **तल्पमिति** । **तल्पं** शय्या, तल्पं शयनीयेस्या दिति धरणिः । **सत्याः** पतिव्रतास्त्रियः । **रतिः** सुरतं रतिःसुरतगुह्ययोरितिमेदिनी । कान्ता कामिनी, शरावाणाः **कौतुक** माश्चर्यम्, **कन्दलयति** जनयति ।

सूत्र०—मारिष, शृणु ।

योवै महात्मा सकले महीतले वन्द्यः समस्तैःसुरथो नृपैरथो ।
क्षत्रर्षभःचैत्रकुलाब्धिचन्द्रः सोऽरातिवर्गेण जितःक्षितीन्द्रः॥८॥

पारि०—भाव, श्रुतपूर्वं मयैतद्वृत्तं पुरा विद्भ्यः परन्तु न संप्रति स्मर्यते ।

सूत्र०—शृणु। कोलाविध्वंसिभिः शत्रुभिर्हृतसर्वस्वः सक्षितीश्वरः साम्प्रतं मे गृहे स्थातु मसाम्प्रत मिति मनसि कृत्वा मृगया व्याजेन वातरयं हयं समारुह्य तपोवनं प्रतिययौ ।

पारि०—ततस्ततः ।

सूत्र० तपोवन मवलोक्य, अहोरमणीयोऽयमाश्रमः प्रशान्तश्च । दृष्ट्वेमं जाता काचिन्मे निर्वृतिः तदत्रावश्यं किंचिद्विश्रमितव्यमिति मुने राश्रमंप्रविवेश । (तत्र मुनि मवलोक्य) हन्त दुरन्त तपसापहृत किल्विषततिः कश्चन यतिरपीह दृश्यते । तत्सर्वथा जातं ममात्र सफलमागतम् । इति विचार्योपसृत्य च प्रहृष्ट मना मुनिं प्रणनाम । मुनिनातेनानुमतःसत्कृतश्च वनमितस्ततोऽवलोकयामास । अहो पूर्वं महोदया अपि शत्रुणाक्रान्ता मम पुत्रकान्तादयः संप्रति कथमिव वर्तन्त इति यावद्विचारयति तावत्पुरोदृष्ट्वा अये, कोऽयमत्र पवित्र धीरसमीर स्पर्शहर्ष मनुभवन्नास्ते, किंच श्रेष्ठाकृति रपि विभाव्यमानशोकविकृतिः तत्सर्वथापीह न युज्यते । यतः—

वन्द्योवन्दनीयः। **सुरथः** सुरथनामा, **अरातिवर्गेण** शत्रुसमूहेन, पुरा **विद्भ्यः** पुराणज्ञैः 'पुरापुराणेनिकटे इत्यमरः । **कोलेति** । एतन्नामकैरित्यर्थः । सांप्रतमद्य, **असाम्प्रत**मयुक्तम् । **मृगयाव्याजेन** मृगयां शिकार इतिभाषा, **वातरयं**-वायु सदृशवेगम् **हय**मश्वं **आगत**मागमनम्, **सत्कृत** आदृतः **अवलोकयामास**ददर्श,

मुनिसंनिधिमप्यागतो भवति न कश्च न तापी ।
शिवनाम स्मृतितो यथा तरति महानपि पापी । ९ ॥

अथवा मुनिसंनिधावेषगतएव न यतः—

सकलपदार्थाः संन्ति यद्यप्यधि भुवस्तलम् ।
किन्तुभाग्यरहितो जनः किन्तान् लब्धुमलम् ॥ १० ॥

(प्रकाशम्) भद्र, कोभवान्, किमत्र जनसङ्गरहिते मृगहिते घोरप्रचारे कान्तारे संचार कारणम् । कथमाकृत्यापि मुग्धस्त्वं शोकदग्ध इव लक्ष्यसे इति पप्रच्छ ।

पारि०—किमाह वैश्यः ।

सूत्र०—एवं पृष्टः शोकाकृष्टः स वैश्यः प्राह—सौम्य, सम्यगुपलक्षितंभवता, तदहंसर्वमपिवृत्तंत्वच्छ्रु तंकृत्वाक्षीणशोकोभवामि ।

यतः—

प्रेमपूर्वं पृच्छकाय जनाय व्यसनं निजम् ।
निवेद्य लोको निः शोको भवती त्यनुशुश्रुमः ॥ ११ ॥

सौम्य, समाधिनामधेयोऽहं वणिक् दुर्वृत्तैः पुत्रकलत्रैःसर्वमपि मे द्रव्यजात मात्ममात्कृत्य गृहान्निष्कासितः । ततोऽहं परं विषाद मापद्य वनमिदमासाद्य तिष्ठामि । संप्रतिते कथमिव वर्तन्ते इतिन जानानः चिन्ता सन्तान तप्यमानस्ततोपि द्विगुणतर मस्मि निर्वेदमापन्नः । राजा-प्राह—वयस्य, वैश्यप्रवर, विचारमूढस्त्वंमे प्रतिभासि । यतोविगुणानामपितेषां सगुणानामिव प्रेमामृतसरसि निमज्ज्यरज्यसि ।

इहेति । शोकदुःखादि रहितेतपोवनइत्यर्थः । **मुनिसंनिधिमिति** । **संनिधिं**-समीपम्, **आगतो** प्यागत एवेत्यर्थः ॥ किमुतसज्ञादिनेतिभावः । **स्मृतितः** स्मरणात् । **कान्तारे**-गहनंवने, **संचारकारणं** ... स्तत्रगुणां इतिन्यायेनाह ... **मुग्धः** सुन्दरः ।

वैश्यः—नजाने कथमेतत्।

राजा (स्वगतम्) अहह दुःसहः खलु स्नेहोनामारिः। यद्वशादेष पश्यन्नपि न पश्यति जानानोऽपि न जानाति। भवतु। किंचिदुपदिश्य मोहमस्य क्षण मपनयामि।

राजा—(प्रकाशम्) वयस्य,

पुत्र मित्र कलत्रादीन्स्वार्थपात्रस्यसाधकान्।
विज्ञाय ज्ञानमासाद्य परमं सुख माप्नुहि॥ १२॥

वैश्यः—भद्र, सम्यगुपदिष्टं भवता, परमेष तवोपदेशः मम मनो लेशतोपिनो स्पृशति। राजा—कथमिव, वैश्यः—नजाने।

पारि०—किमाह राजा।

सूत्र०—ततोराजाप्राह—सखेइदमप्यत्रकारणं भवेत् यदहमपिवस्तुतः पुत्र पौत्र कलत्र राज्यादिस्नेहानुवंधीत्वादृश एव तथासति ममोपदेशः—परोपदेशेपांडित्यमितिन्यायेन कथमन्यं प्रवोधयेत्। अथवा घुणाक्षर न्यायाभिप्रायादेष मेस्तु।

वैश्यः—भद्र, अस्तं जिगमिषु रिदानींभगवान् भास्वान्।

राजा—मार्तण्डमण्डलं वीक्ष्य प्रणमति। सखे—अयमेव भगवान्सप्तसप्ति रुदयास्तमयेसमये रक्तःसन् किमपि निदर्शयति—यत्संपदि विपदि प्रसादो विषादो वा नभवति महात्मनाम्। एष एव च सन्ध्ययो र्द्वयोरभिष्टतः शोक विमोकः सर्वलोकस्य भवति।

'मुग्धः सुन्दरमूढयो रित्यमरः। **शोकदग्धो** मूढवत् शोकदग्धो लक्ष्यस इत्यर्थः। **उपलक्षितं** ज्ञातं **पृच्छकाय**पृच्छते कर्तरिण्वुल्। **निवेद्य** कथयित्वा, **वणिग्** वैश्यः। **दुर्वृत्तै**र्दुष्टैः। **आत्मसा** त्स्वाधीनं देयेत्राच, इति सातिप्रत्ययः। **विषादं**—दुःख **मापद्य** प्राप्य **निर्वेदं** दुःख **मापन्नः** प्राप्तेस्मि।

तत्त्वमध्येनं प्रणम । वैश्यः (प्रणम्य) भद्रकोय मग्रे महोत्सव इवलक्ष्यते । राजा(निपुणं निरूप्य) सौम्य, सर्वे वनवासिन इमे संन्यासिन इतरेच प्रेमघना जनाः पुण्यमये संध्यासमये महा मुनिं प्रति प्रणति पुष्पांजलीन् कुर्वन्ति । तदागच्छावामपि प्रणम्य तदुपदेश वचनामृतं पास्यावः ।

वैश्यः—भद्र, अमृतंपास्याव इति कथं समीचीनं ते वचनम् ।

यतः—पातालं स्त्रीमुखं नाकः सागरश्च सुधाकरः ।
एतान्यमृतधामानि प्रवदन्ति मनीषिणः ॥१३॥

पारि०—भाव, ततः किमुत्तरयामास प्रजाधीशः ।

सूत्र०—राजाप्राह । वयस्य, अविचारिताभिधानमेतत् ।

यतः—गरः पत्युमृतिः स्वल्पस्थितिः क्षारंत्तयोयतः ।
ततस्तेषुच मन्तव्य ममृतं न कथंचन ॥ १४ ॥

पारि०—भाव, साधु समाहितं राज्ञा ।

सूत्र०—अथकिम् ।

पारि०—ततस्ततः ।

विचारमूढः विवेकशून्यः **प्रतिभासि** दृश्यसे, **विगुणानां** प्रतिकूलानां **सगुणा**नामनुकूलानामिव, **तेषां** पुत्रकलत्रादीनाम्, **प्रेमेति** । प्रमैवामृतं तव **निमज्य**-स्नात्त्वा, **रज्यसि**-प्रसन्नोसीत्यर्थः । **स्वगतं**मनसिविचार्य । **अपनयामि**-दूरीकरामि । **आप्नुहि** लभस्व, आप्नोतेर्लोट् सेर्हिः ।

स्नेहानुवंधी स्नेहवान्. **अथवेति** समाधानम् । **यमान्तरेति** । [illegible] कीर्तितः [illegible] पुरुषोत्तमा [illegible] तिनः । सयथाकदाचिदसाध्यमपिसाधयतितद्वत् ।

सूत्र०—ततः संध्यादि सकलकृत्यमभिकृत्यस्थूलसूक्ष्माव्यवहित विप्रकृष्ट ज्ञानवां स्तत्रभवान्महर्षि र्यावत्तिष्ठति तावदेतौ द्वावपि सहितौ समुपेत्य प्रणेमतुः। राजा कंचित्कालं स्थित्वा सप्रश्रयमूचे।

भगवन्! विदित वेदितव्य, कर्तव्य शिक्षक, किंचिदस्तिमेप्रष्टव्यं यदि श्रीमतामस्ति नियोगोपयोगः। मुनिराह—

राजन्! विश्रब्ध मापृच्छस्व यदस्तितेप्रष्टव्यम्।

राजा—आहारो निद्राभयं रतिरेतत्सममेव।
यदा नरेष्वथ पक्षिषु तदा भिदा खलुकेव ॥१५॥

मुनिः—राजन् साधु पृष्टोस्मि श्रूयताम्।

एकस्तत्र हि विद्यते ज्ञाना ज्ञानविशेषः।
अन्यत्कर्तव्ये तयोर्भेदस्यापि न लेशः॥ १६॥

राजा—तत्कथंमे राज्यं प्राज्यं मोह मज्ञस्येव विज्ञस्यापि जन यति। किंच अयंहि वैश्यः तिरस्कृत्य पुत्र भृत्यप्रभृतिभि र्नितान्त मुज्झितोपि नतानउज्झतिमनसा। तत्कथमावयो र्जानतोरप्यज्ञानवतो-

---

समीचीनं युक्तं, **पाताल** मधोलोकः। अधोलोकस्तु पातालं मित्यजयः। **स्त्रीमुखं**-स्त्रीवदनं, मुखन्तु वदने मुख्ये इतिभागुरिः। **नाकः** स्वर्गः **सागरः** समुद्रः **सुधाकर** श्चन्द्रः। **अमृतधामा**नि—अमृतस्थानानि, धाम स्थान प्रभा-वयो रितिहिमचन्द्रः। **प्रजाधीशो** राजा, **गरो** विषं **क्षयो** नाशः **द्वौ** राजवैश्यौ।

कालं समयं, कालोमृत्यौ चसमयेइतिमेदिनी। **सप्रश्रयं** सविनयं, **ऊचे** जगाद, ब्रूञोलिट्। **नियोगोपयोग** आज्ञावसरः, **विश्रब्धं** निःशङ्कम्, **आपृच्छस्वेति**। 'आङिनु प्रच्छयो रित्यात्मनेपदम्। **भिदेति**। आपंचैव हलन्तानामित्याप्। भेदस्यलेशो-लवोपिनेत्यर्थः। अपि भिन्नक्रमः। 'लवलेश कणाणव' इत्यमरः। **प्राज्यं** प्रचुरं, प्रभूतं प्रचुरं प्राज्यमित्यमरः। **नितान्तं** सर्वथा, **उज्झितो**पि त्यक्तोपीत्यर्थः।

रिवैषा दोषाविष्कृतिः ।

मुनिः (सश्लाघम्) राजन् ज्ञानवानसि । प्रसन्नोऽस्मि ते मतेर्विभवोपरि । यया इमे समेपि ज्ञानवन्तो नरदेहवन्तोऽस्मिन्ममतावर्ते मोहगर्ते निपतन्ति सा एका शक्ति र्भगवती । तत्प्रभावेणैव सर्वमपि जगदिदं मुह्यति ज्ञानिनामपि मनांसि मोहे सकल दुःख सन्दोहे पतन्ति । का कथा पुनर्वृथाभिमानिनामिति । तस्या एव च श्रुतयोनिःश्वसितं पंचभूतानि वीक्षितं चराचरंस्मितं महाप्रलयःसुप्तमिति ।

राजा—किंनाम तस्याः । मुनिः—सप्रणय कोपम् ॥

मायानसा सकलकायात्मिका किमनपायाश्रुता भगवती
पुण्यापरं सकलगुण्याभिमानततिशून्या त्वयात्रभवती ।
कत्री पुरा तदनु भर्त्री ततो नु खलु हर्त्री समस्त जगतो
दक्षास्वभक्तजन रक्षाविधौ विबुधपक्षावलम्बनकरी ॥१७॥

अपिच—याभीकरी शुभकरी परमा च माया ।
तांज्ञातु मिच्छसि यदि त्वमनंतशक्त्याः ।
भक्त्या स्वभक्त दुरितौघ विखण्डिकायाः ।
पादारविन्द युगलं स्मर चण्डिकायाः ॥१८॥

सश्लाघं-सप्रशंस **समेपि**-सर्वेपि, नरदेहवन्त इति प्राणिमात्रस्योपलक्षणम् । **ममतेति** । अहंममाहमस्येतिममत्वरूपे मोहान्धकूपे, **मुह्यति**-मोहंगच्छति, सकल **कायात्मिका**-जगत्कारणत्वात । **अनपाया**-नित्या **सकलगुण्या**विगुणा **सात्रभवतीभगवती माया** दुर्गायाःशक्तिः **दक्षा**निपुणा, **विबुध**ज्ञानिनादयाश्च । या महामाया दुष्टानां भीकरी शुभकरी भक्तानाम् । तांज्ञातु मिच्छसि यदि तदेत्यर्थः ।

किमनल्पजल्पनेन—

देवी स्तोतु जगद्व वश्यं सर्वेनश्यन्त्युपद्रवाः ।
मानं धनं च सत्पुत्रं कलत्रं भवतिध्रुवम् ॥ १६ ॥

अपिच—ऋण रोगादि दारिद्र्यं पापश्च अपमृत्यवः ।
दूरादेव पलायन्ते नीहारा भास्करादिव ॥२०॥

किंच—राजन् सर्वमहं जानामि त्वद्विषये यादृशोऽसि । शोकं माकार्षीः । इदमकस्मात्पतितं दैवतन्त्रं दुःखयन्त्रंत्वमनुभूय भूयोपि लब्धसर्वस्व श्चिरकालं सुखचक्रवालं भुक्त्वाग्रे सावर्णिको नाम मनुर्नुतमित्रो विवस्वत्पुत्रो भविष्यसि । अथचायं ते वयस्यो वैश्योपि प्रवरं देवीवरं लब्ध्वा वहुप्रयास संचिते वित्ते तड़ित्प्रख्ये सौख्येच विरक्तोभूत्वा परमज्ञानवान्भविष्यति ।

पारि०—भाव, कथमेतत्समस्तं वृत्तंमुनिनातेनावोचि ।

सूत्र० । (स्मित्वा) त्रिकालज्ञत्वान्मुनीनाम् ।

राजा—सप्रणयमंजलिं वध्वा-भगवन्, याभवतैका चण्डिकाराधना योपदिष्टा सा किं किं नाम विशिष्टा कथमुत्पन्ना प्रसन्ना च भवति केनकेन नाम्ना स्तुतासती कानि कानि चाद्भुतानि चरितानि भक्तानां कृते कृतवतीति मे बलवती जिज्ञासा ।

मुनिराह-राजन्, कार्यकारित्वेन देवतानां नामानि भवन्ति । मुख्यानितु महाकाली-महालक्ष्मी-महासरस्वती-त्यादीनितस्यानामानि ।

उपद्रवा-विघ्नाः **मानं**यशः । **नीहारा**-हिमानि, **भूयोपि** पुनरपि, **सुखचक्र-वालं**-सुखसमूहं, **अग्रे** जन्मांतरेः **विवस्वत्पुत्रः** सूर्यसूनुः, **वयस्यः** सखा, वयस्यः सवयाः सखेत्यमरः । **तड़ित्प्रख्ये**-विद्युत्समाने, "तड़ित्सौदामिनीविद्यु दित्यमरः । बलवत्युत्क्टा, **जिज्ञासा**-ज्ञातु मिच्छा, **तस्याः**-चण्डिकायाः, ।। **संसारेति** संसार एव सागर स्तत्रलसन् **योघनो** निविड़ः पापमेवपङ्कः कर्दम स्तत्स्यप्रक्षालने दूरीकरणे

श्रृणु--

संसारसागरलसद्घन पापपङ्क
प्रक्षालनैकनिपुणां सुरदीर्घिकावत् ।
ब्रह्मेश्वरप्रभृतिदेवनिषेवणीयां
तांयान्तियेशरण माशुशमाप्नुवन्ति ॥ २१ ॥

किंच--

यत्पादपद्म मकरन्दरसंहिपीत्वा ।
हित्वा समस्त विषयान् विषवद्रसज्ञैः ।
स्वानंदनीरनिधिवीचिनिमग्नचित्तैः
संमन्यते जगदशेषमिदंतृणाभम् ॥ २२ ॥

अपिच—अपारसंसारसमुद्रमध्ये निमज्जतां या शरणंगतानाम् ।
विनाश्यदुखान्यखिलानिकामंदत्तेनिकामं भुविभावुकानाम् ॥ २३

अन्यच्च —यत्पूजनीयकमनीयपदारविन्द प्रस्यन्दमानमकरन्द-जुषांनराणाम् । किंकार्यमार्यकरणीयमसाध्यमास्ते नो-साध्यते खलु यदत्र परत्र लोके ॥ २४ ॥

निपुणामतिचतुराम् । किंवत्-सुरदीर्घिकावद्गङ्गावत् । **ईश्वरः** शिवः । **आशु**-शीघ्रं, शंसुखमाप्नुवन्ति लभन्ते । **यत्पादेति** । यस्याः पादएवपद्मं तस्यमकरन्दरसंमधु. स्वानंन्द एव नीरनिधिर्जलधि स्तद्वीचयस्तरङ्गास्तत्रनिमग्नचित्तैः । तृणाभतृणवत् ।

अपारेति । अपारोदुस्तरोयः संसार एव समुद्र स्तन्मध्ये निमज्जतां पतितानां पश्चाच्च शरणं गतानां भावुकानां पुंसामखिलानि दुःखानि विनाश्य यादेवीभुव्यपि निकामं यथेच्छं काममीप्सितं दत्ते प्रपूरयति । **यत्पूजनीयेति** । यद्यस्याः । आर्यैः श्रेष्ठैः करणीयमाचरणीयं, अत्रपरललोके तत् किं असाध्यमास्ते यत् नासाध्यते क्रियते किमपिनेत्यर्थः **देवकार्यसिद्धे**: कृते-देवकार्य संपादनाय आविर्भवति शरीरं गृह्णाति ।

साभगवती—देवकार्यसिद्धेः कृते आविर्भवतियदा ।

नित्या सत्यपि कथ्यते उत्पन्नेतितदा ॥ २५ ॥

राजा—कथमिव, मुनिः — राजन्, सर्वमादितः प्रभृतिकथया-मितेकृते । इत्युक्त्वा समग्रं देवीचरित मव्यग्रं श्रावयामास ।

पारि०—भाव, ज्ञातमस्यनाटकस्यमूलं त्वमिदानींमनीषितं कुरुष्व ।

सूत्र० मारिष, त्वमद्य सद्यः सर्वं संस्कृतभाषि पात्रवृन्दममन्दचेष्टं कुरुष्वावधानदानेन ।

पारि० यथा ज्ञापयति भावः । इतिनिष्क्रान्तः ।

सूत्र०—अहमिदानीं मान्यमहोदयान्सहृदयान्प्रति किमपि विज्ञापयामि । (प्रणिपत्य)

शृणुत शृणुत विज्ञा दोषमात्रानभिज्ञाः
यदिह किमपिकर्तुं यत्यते ऽस्माभिरद्य ।
प्रगुण निपुणतायाः पात्रवर्गस्य कार्या
दथरसलसतो वा नाटकस्य प्रभावात् ॥ २६ ॥

(नेपथ्ये) अहो अब्रह्मण्यम्-अब्रह्मण्यम् ।

सूत्र० (कर्णंदत्त्वा) अये कथ मिव मत्कथनानन्तरमेव कस्यापि विगतक्षणः कुलक्षणः शब्दः श्रुतिपथमवतरति । (विमृश्य) भवतु । ज्ञातम् । ताभ्या मसुराभ्यामाकुलीकृतस्यब्रह्मणोभवेत् । तदिदानीमत्र स्थातु मनुचितं यत एकोपि दानवो दृष्टिपतितो महतींभीतिंजनयति किं पुनर्द्वाविति निष्क्रान्तः । इति प्रस्तावना ।

शृणुत शृणुतेति । चापले द्विरुक्तिः । संभ्रमेण प्रवृत्तिश्चापल मितिकाशिका । **विज्ञाः**, विशिष्टज्ञानवन्तः, **यत्यते** प्रयत्यते, **पात्रवर्गस्य**-पात्रसमूहस्य, **प्रगुणेति**। प्रकृष्टभिज्ञतायाः **रसलसतः** रसेन वीरादिना, लसतो भासमानस्येत्यर्थः । नेपथ्यइति । **नेपथ्यं** जवनिका, नेपथ्यं स्याज् जवनिका रङ्गभूमिः प्रसाधन मित्यजयः । **विगत-क्षणः** हर्षरहितः ।

(ततः प्रविशति संभ्रान्तो ब्रह्मा)

ब्रह्मा—ननु भो असुरौ, कथंकारमकारणमेवयुवां मां मारयितु मिच्छथः।

असुरौ—प्रकृत्यैव नो धर्मात्मानो द्वेष्याः प्रियाश्चपापात्मानः।

ब्रह्मा—(स्वगतम्)

विष्णुः श्रीमानद्यवै जलमग्ने भुवने।
कल्पान्ते निद्रात्यहौ वारां नैधवने॥ ७॥

इमौ च विष्णुकर्ण मलजौ दुष्टदनुजौ मांहन्तु मुद्यतौ। तत्किमिदानीं कर्तव्यम्। (निध्याय) आं ज्ञातम्।

योमायया त्रिगुणयापि जगत्समग्रं संयच्छते सृजति पातिच सज्जते न। यो विश्वकारणमनादि रनन्तशक्ति र्भक्त्या तदीय चरणं शरणं करोमि॥ २८॥

अपिच—**रुद्रोपियस्य किल शक्त्यवबोधकस्य नोवेदतत्त्व मथकृत्स्नतयापिवेदः। तंभावयेस्वहृदये शरणागतानामाशु प्रणश्यति यतः सकलोपिखेदः॥ ९॥**

संभ्रान्तइति। शंकितस्त्वरतश्चेत्यर्थः। शंकात्वासौ चसंभ्रमइतिदशरूपकम्। **नन्वाक्षेपे** 'नन्वाक्षेपे परिप्रश्ने इति हेमचन्द्रः। **मारयितुं** हन्तुं 'व्यापादनं च हननं मारणं चेतिभागुरिः। प्रकृत्यैव स्वभावेनैव, नोऽस्माकं, प्रियावल्लभाः, 'प्रियं हृद्यं मनोहारि दयितं वल्लभं त्रिषु' इतिगोपालः। **अहौ** शेषे अहिर्वृत्रासुरे शेषे इति रत्नमाला। **वारां नैधवने** समुद्रजले, वनं नीरे ऽम्बुजेऽक्लीव मितिमेदिनी। त्रिगुणया-सत्वरजस्तमोल-क्षणया, लोहित शुक्ल कृष्णा मितिश्रुतेः। सज्जतेरात्मनेपदं 'यदभिप्रायेषु सज्जते' इतिभाष्यकारोक्तेः। विश्वकारणमिति। 'यत इमानिभूता नीतिश्रुतेः।

स्तोत्र

(सप्रणय मंजलिं बद्ध्वा)

विष्णो, सर्वस्यत्वमेव जगतोऽसिस्वामी ।
क्षमा सिन्धुरनुपम दयावानन्तर्यामी ॥ ३० ॥
स्थावर जङ्गम रूपिणी भयाकृता सृष्टिः ।
सर्वत्रापि यथायथं भवति भवद्दृष्टिः ॥ ३१ ॥
जीवन मथमरणं सुखं दुःखं तवहस्ते ।
भगवन्नितिहेतोः सदृक् वद पुरुषः कस्ते ॥ ३२ ॥
किंच-यशोऽपयशोपि ते दृष्टि कुदृष्टि फलम् ।
इच्छसि यत्कुरुषे तदेव चलति हि कस्यबलम् ॥ ३३ ॥
तवशरणं समुपागतो यदि ना कश्चनतापी ।
तर्हि सवितु रप्यग्रतो भवेत्तमः संस्थापि ॥ ३४ ॥
सिन्धु स्थाने विन्दुमपि कर्तुं त्वं शक्तः ।
भवति मेरु रपि सर्षपः कृपया तवरिक्तः ॥ ३५ ॥
दशशत वक्त्रैः सर्पराड् गायन् कीर्तिन्ते ।
स्थगितो भवति तथापि तत्पारं नोलभते ॥ ३६ ॥

रुद्रोऽपीति । **रुद्रः** शिवः, **यस्य** विष्णोः, कृत्स्नतया-साकल्येन ।

ना पुमान, **तापी** दुःखी, **सवितुः सूर्य**स्यापि अग्रतः पुरः, **तमो**ऽधकारस्य, संस्थापिस्थितिरपि, भवेदेव मित्याशयः । **सिन्धुस्थाने** सिन्धुः समुद्रः 'देशे नदविशेषेऽब्धौ सिन्धुर्नासरिति स्त्रिया मित्यमरः । **शक्तः** समर्थः, **मेरुः**सुमेरुपर्वतः **रिक्तो**रहितः । दशशत वक्त्रैः सहस्रमुखैः, सर्पराट् शेषोपि ।

अतएवास्मि चतुर्मुखैरीश्वर जगदीश ।
तावक गुणगानं कथं हरे कर्तुमीशः ॥ ३७ ॥
त्वंसर्वैरपि सर्वदा भक्त्या स्मरणीयः ।
दुःखौघस्तेषां सदात्वयापहरणीयः ॥ ३८ ॥

असुरौ—यावदयं किमपि ध्यायति तावदन्यत्र कुत्रचिद्गच्छावः इति निष्क्रान्तौ ।

(आकाशे)

ब्रह्मन् ! भगवत्या योगनिद्रायाः स्तवस्त्वयाद्य कर्तव्यः ।
सैव प्रसन्नासती तेऽभीष्टसाधयित्रीभवित्री ।

ब्रह्मा—आः सुस्ठुस्मारित माकाश वाण्या । तदिदानीमहं विष्णुं प्रबोधयितुं स्थिति संहार कर्त्रीं जगद्धात्रीं भगवती मेकतानेन ध्यानेन स्तौमि । (प्रणिपत्य) भगवति योगनिद्रे ।

सावित्री परमा रमास्यथ सुधामेधा त्वमेव स्मृतिः
त्वंदेवा प्रकृतिः समस्त जगत स्त्वं श्रीस्तथाह्रीरपि ।
शान्तिः क्षान्ति रथो ति सुन्दरतरा पुष्टिश्चतुष्टिः परा
घोरात्वं सकलास्त्रिणी त्वमथवाशक्तिः परा किंस्तुमः ॥३९॥
इमौ हन्तुं यमनिभौ दानवौ मधुकैटभौ ।
प्रबोधय द्रुतं विष्णुं जिष्णुं मामद्यरक्षितुम् ॥ ४० ॥

स्तवः-स्तुतिः 'स्तवः स्तोत्रं स्तुतिर्नुतिरित्यमरः । **भवित्री**भविष्यतीत्यर्थः । **स्थितिः** पालनं, **एकतानेन** विषयान्तराप्रसक्तेन, **ध्यानेन**-मनसा, **सावित्री**-सर्व· मनोरथ साधयित्री, **परमोत्कृष्टा**, **रमा**लक्ष्मीः **सुधा**-अमृतरूपा, **प्रकृतिः** प्रधानकारणम्, ह्रीर्लज्जारूपा । **यमनिभौ**-यमसदृशौ, जिष्णुंजयनशीलं **विष्णुं** द्रुतमाशु, **प्रबोधय**ोत्थापय ।

(नेपथ्ये)

ब्रह्मन्, विष्णुशक्तिर्योगमायाहं तुष्टास्मि ते स्तुतेः । एषविष्णु र्भक्तव्यसनमसहिष्णु रतिशीघ्र मुत्थाप्यते ।

(ततः सहसोत्तिष्ठति विष्णुः ।)

ब्रह्मा—(विष्णुं दृष्ट्वोत्थायच) देव, त्रिभुवननाथ, परित्रायतां परित्रायताम् ।

विष्णुः—(सोत्प्रासप्रणयम्) ब्रह्मन्नलंवैक्लव्येन शीघ्रमुच्यतां कुतोभवान् परित्रातव्यः ।

ब्रह्मा—(सत्रासं कम्पमभिनीय) असुराभ्याम् ।

विष्णुः—कुत इहासुरसंभावना ।

ब्रह्मा—भवतः कर्णयोर्मलतः ।

विष्णुः—कपुनस्तौ ।

ब्रह्मा—इदानी मत्रैवास्तां न जानेकुत्रगतौ, भवतु । एवं कथयामि—

रे दानवौ कथयतां कगतौ भवन्तौ
एकाकिनो मम वधे विहित-प्रयत्नौ ।

तुष्टास्मि प्रसन्नास्मि, **एष** समीपतरवर्ती, समीपतरवर्ति चैतदोरूप, मित्यनुशासनात् । **परित्रायता** मिति संभ्रमे द्विरुक्तिः । **कुतः** कस्मात्, **परित्रातव्यः** रक्षणीयः **इदानी** मधुना । **एकाकिनो** ऽसहायस्य, **मम** ब्रह्मणः,

चेद्रुत्तथः कमपि वीर-पदाभिमान
मागत्य विष्णु-दहने भवतं पतंगौ ॥ ४१ ॥

असुरौ—(प्रविश्य) अये, कोनु खल्वावा माह्वयति । (पुरोऽवलोक्य) (परस्परम्) अन्योपि कश्चन शङ्ख चक्र गदा पद्मधरः परमसुन्दरः पुमानेतस्यावयोर्वध्यस्य समीपे तिष्ठति । भवतु । पृच्छावः ।

मधुः—(समीप मुपसृत्य) ननु को भवान् ।

विष्णुः—(सस्मितम्) आ दुष्टौ मधुकैटभौ किं ? मामपि न जानीथः । अस्तु । शृणुतम ।

असुराणामहं हन्ता सुरत्राता स्म्यथो हरिः ।
युवां हत्वा भविष्यामि कैटभारिश्चमध्वरिः ॥ ४२ ॥

कैटभः—(उपसृत्य) मधो, किमयं प्रलपति ।

मधुः—(सोपहासम्) युवयो र्निग्राहक इति ॥

कैटभः—(सक्रोधम्)

रे रे मिथ्याप्रगल्भ त्वं सज्जो भव यमालये ।
त्वामेव प्रथमं नीत्वा पश्चादेनं विलोकये ॥ ४३ ॥

विष्णुः—(विहस्य) रे दानवापसदौ,

चेत् यदि **कमपि** वीरत्वाभिमानं रक्षथः । **तदागत्य** विष्णुरेवदहनोऽग्निः मयूरव्यंसकादिसमासोरूपकंच । **तत्र पतङ्गौ** पक्षिविशेषौ, पतङ्गौ पक्षिसूर्यौ चेत्यमरः । **भवतं** जायेथाम् , **असुराणां** दानवानां **हन्ता** मारकः । **प्रलपति** अनर्थकं ब्रवीति, प्रलापोऽनर्थकं वच इत्यमरः । **निग्राहको** मारकः । **रे रे** इति हीनामन्त्रणम् **एनं** ब्रह्माणं **विलोकये** विलोकयिष्ये, वर्तमान सामीप्येलट् ।

नन्वहं सर्वदा सज्जः सज्जनानभिरक्षितुम् ।
सज्जमेतद्धि मे चक्रं वक्रं दुर्जनता कृते ॥ ४४ ॥

मधुः—अहो धृष्टताऽस्य मनुष्यकीटस्य यद् द्वाभ्यामपि न बिभेति । सकोपाटोपम् । अरे रे विकत्थनाप्रगल्भ, अतिहि नाम प्रगल्भसे तदलमलीक वचःसंग्रामेण कुर्वः संग्राम प्रारम्भं विलोकिष्यते याहशोभवान् ।

विष्णुः—आः पापौ कथं वाग्विभीषिका शीघ्रं क्रियतां युद्धारम्भः। (इतितदेव कर्मारभन्ते ।)

मधुः— कैटभ, महाबलिष्ठोऽयं यत्सहस्रसमा-परिमाणमयेन समयेन द्वाभ्यामपि सह युध्यमानस्तथैवसाभिमानः परिदृश्यते । तन्नूनमावां हनिष्यति । किमत्रप्रतिविधेयम् ।

कैटभः—यथाते रोचते ।

मधुः—भवतु । एवं कथयामि । हरे, अविराम-संग्राम-करणे प्रकाण्ड-पण्डितोऽसि । अतश्च—

आवामतिसंहृष्टौ तवबलदृष्टौ रणक्ष्मामध्ये ।
वरमावयोः सकाशाद्वृणुतायोरोचतेभवते ॥ ४५ ॥

विष्णुः—(विमृश्य) दानवौ, नाहं वराभिलाषी, किन्तु युद्धविलासी, यद्याग्रहः तदाद्वावपि युवां ममवध्यौ भवेतां किमपरेणवरेण

असुरौ—(श्रुत्वा सखेद मन्योन्य मवलोकयतः ।
हन्त वंचिता वावा मनेन वंचना पटुना ।

दुर्जनताकृते दुर्जनानां समूहो दुर्जनता ग्रामजनबन्धुभ्यस्तल् । **वक्रं** कुटिलम् **चक्रं** सुदर्शनम्, **विकत्थनाप्रगल्भ** आत्मश्लाघिन, विकत्थनः स्तवः श्लाघा इतिहलायुधः। **प्रगल्भसे** प्रलपसि, **अलीकं** मिथ्या, **तदेव** युद्धात्मकमेव । **युध्यमानः** युद्धं कुर्वाणः, **रणक्ष्मामध्ये** रणभूमौ, क्षितिःक्षान्त्योःक्ष्मेत्यमरः। **अपरेण** अन्येन **वरेण** किम् नकिमपि प्रयोजनमित्यर्थः। **अन्योन्यं** परस्परं, **अवलोकयतः** पश्यतः।

(सर्वां पृथ्वीं जलप्लुतां दृष्ट्वा)

अथवैवं कथयावः । हरे यत्र जलविधुरा वसुन्धरा वर्तते तत्रावां जहि ।

विष्णुः—(तथेतिमत्वा क्षणं ध्यात्वा च) स्वजघनस्थलं विपुलं करोति ।

(अन्तरिक्षे पुष्पवृष्ट्यनन्तरं)

(नेपथ्ये)

भगवन्, मधुकैटभारे !

तवेदं परमाख्यानं यः श्रोष्यति समाहितः ।
भवेत्तस्याधिराहित्यं साहित्यं च विधेर्यथा ॥ ४६ ॥

विष्णुः— परमनुगृहीतोस्मि ।

(ततः प्रविशति ब्रह्मा)

ब्रह्मा—न जाने कथमद्य विष्णुः ।

(नेपथ्ये)

ब्रह्मन्, मास्म चिन्ता सन्तानै रात्मानं दुःखाकुरु ।
दानवौतौ विष्णोः चक्रानले पतङ्गत्वमाप्तौ ।

ब्रह्मा—(हर्षं नाटयति)

जलविधुरा जलरहिता **वसुन्धरा** पृथ्वी, **आवां** मधुकैटभौ, **जहि** मारय, हन्तेर्लोट् सेहिः । **ध्यात्वा** विमृश्य, **विपुलं** विस्तृतं, **अन्तरिक्षे** गगने, नभोन्तरिक्षं गगनमित्यमरः । **इदं** मधुकैटभनाशरूपम् । **परमाख्यानं** चरितं **यः समाहितो** दत्तचित्तः **श्रोष्यति** पठिष्यति. **तस्याधि** मानसीव्यथा **राहित्यं साहित्यं** [illegible] **विधेः** [illegible] भवेत्

विष्णुः—बहुसमयो मे व्यतीतो लक्ष्मीं परित्यक्तवतोब्रह्माणंच तदिदानींशीघ्रमुपगम्याश्वासयितव्यौतौ।(परिक्रम्यावलोक्यच) अये, एष ब्रह्मा इत एवागच्छति।

ब्रह्मा—(समीपमुपसृत्य) भगवन्, सुरासुरजिष्णो, विष्णो, नमस्करोमि।

विष्णुः—एह्येहि सुरज्येष्ठ, इति सहर्ष मालिङ्गति।

ब्रह्मा—

भगवन्, ज्ञातुमिच्छामि यमाभौ मधुकैटभौ।
कयारीत्या दुरात्मानौ हतौमत्परिपन्थिनौ ॥ ४७ ॥

विष्णुः—ब्रह्मन्नेहि, प्रियतमा-रमा-समक्ष मेतेन वृत्तेन मनो विनोदयावः । इति निष्क्रान्तौ । इति प्रथमोऽङ्कः ।



चक्रानले चक्ररूपाग्नौ **पतङ्गत्वमाप्तौ** भस्मीभूतावित्यर्थः । **तत्** तस्माद्धेतोः यत्तद्यतस्ततो हेतावित्यमरः । **इदानीं** शीघ्र **मुपगम्य** गत्वा **तौ** लक्ष्मी ब्रह्माणौ, **सुरज्येष्ठ!** ब्रह्मात्मभूः सुरज्येष्ठ इत्यमरः । **यमाभौ** यमसदृशौ, **मत्परिपन्थिनौ** शत्रू, **प्रथमोऽङ्कइति** ॥ अङ्कलक्षणंभरते—प्रस्तुतार्थोपसंहारोयत्राङ्कःसोभिधीयते ॥

* इति दुर्गाभ्युदयनाटकसंकेते प्रथमाङ्कविवरणम् *

❀ अथद्वितीयोऽङ्कः । ❀

(ततः प्रविशति विषण्णवदनः कश्चिद् द्युसदनः ।)

हन्त, दुष्टेन महिषासुरहतकेन सर्वमपि देवसैन्यं पराजित्य पराकाष्ठां विषादस्यारोपितो भगवानिन्द्रः । (साञ्जलिबन्धम्) अयि, करुणावरुणालया ब्रह्मेशवैकुण्ठनिलया, अतो दुरात्मतोमहिषासुरात्पाहिपाह्यस्मान् त्रिदशान् । (व्यथां नाटयित्वा) अये, तस्मात्परमदारुणात् रणात् परं विश्रान्तोऽहं मत्यङ्ग भंगविकलोजात स्ततः किंचिद्विश्रमितु मत्रैव मयास्थातव्यं यावदत्र नन्दनेवने मनोविनोदायनागच्छति भगवान्मघवा । (इत स्ततो विलोक्य) एष स्वर्गेशः कैश्चनदेवैः परिवृत इत एवागच्छति । तद् गच्छामीति निष्क्रान्तः । इतिविष्कम्भकः ॥

ततः प्रविशतिदेवैः सहेन्द्रः ।

इन्द्रः—(सर्वान्प्रति) भो देवाः सम्प्रत्यस्माभिर्महिषासुरविषयमुद्दिश्यब्रह्मलोकेगन्तव्यम् । देवाः—तथास्त्विति निष्क्रान्ताः ।

विषण्णवदनः शुष्कमुखः **द्युसदनो** देवः । **हन्तविषादे** । हन्त हर्षविषादयोरित्यमरः । **अयीति**-प्रेमसंबोधने, **करुणावरुणालया** दयासागराः, **वैकुण्ठनिलयो**विष्णुः **अतो**ऽस्मात् **दुरात्मतो** दुरात्मनः पञ्चम्यास्तसिल् । **पाहिपाहीति विषादेद्विरुक्तिः** । संभ्रमेविस्मये हर्षे विषादेप्यधिकंपदमित्युक्तेः । **त्रिदशान्** देवान् 'अमरानिर्जरादेवास्त्रिदशाइत्यमरः । **मघवा** इन्द्रः **विष्कम्भक इति** ।

वृत्त वर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भो मध्य पात्र प्रयोजितः ॥

ब्रह्मा—पुरोऽवलोक्य । अये, कथमिमे समेपि महेन्द्रपुरःसराःसुरा इहैवागच्छन्ति । स्मरणं कृत्वा, अथवा स एव विषयोभवेत् ।

इन्द्रः—(पुरोदृष्ट्वा) भो भो देवा, वेदसंवेदनजनितानन्दसन्दोह हर्षितमहर्षिभिःपरिवृत इत स्तिष्ठति भगवान् परमेष्ठी । वीणया गायन्ती सरस्वती च । सरस्वती गायति सर्वे शृण्वन्ति ।

सुखं च दुःखं च सर्वदैवात्र नास्ति कस्यापि भावयित्वा
दशां हि लोकस्य चक्रनेमिक्रमेण शोच्यं न लक्षयित्वा ।
वलन कालस्य दुर्बलोपि वलिष्ठ मप्यत्र जेतुमीशः
मनुष्यमात्रस्य कैवगाथा इदन्तु सहते स्वयं सुरेशः ॥ १ ॥

इन्द्रः—सत्यमुपवीणयति भगवती सरस्वती ।
इदानीमस्ति ब्रह्मणः पार्श्वे गन्तुमवसरः ।

(सव प्रविशन्ति)

इन्द्रः—भगवन्, विदितवेदितव्य, कर्त्तव्यशिक्षक श्रेष्ठ, सुरज्येष्ठ, नमस्करोमि ।

ब्रह्मा—(इन्द्रं दृष्ट्वा) शचीपते स्वागतं भवते ।

समेपि सर्वेपि, **इन्द्रपुरःसराः सुराः** इन्द्रप्रभृतयोदेवाः । **वेदस्य** मन्त्र ब्राह्मणात्मकस्ययत्संवेदनंज्ञानंतेन जातोय आनन्दसन्दोहस्तेनसंजातहर्षायेमहर्षयस्तैः । **परिवृतो** युक्तः **परमेष्ठी** ब्रह्मा, परमेष्ठी पितामह इतिब्रह्मनामस्वमरः । कस्यात्यन्त, मितिमेघदूतश्लोकानुसारेणाह—**सुखंचदुःखंचेति** । **कस्यापीति,** प्राणिमात्र स्योपलक्षणम् । **जेतुमीशः** समर्थः **सुरेश** इन्द्रः । **विदितेति** । विदितं ज्ञातं वेदितव्यं येन तत्संबुद्धौ विदित वेदितव्य, **कर्तव्यशिक्षकेति** । इदमिदानींकर्तव्य मिति शिक्षकेत्यर्थः । **शचीपतइति** संबोधनं शच्याएवेदानीं पतिस्त्वंनदिवस्पति

इदमासनमत्रोपविश्यताम् ।

(सर्वे इन्द्रमनूपविशन्ति)

ब्रह्मा—इन्द्र, कथमुद्विग्नोसि ।

इन्द्रः—भगवन्, सर्वज्ञोसि, तथापि ।

दानवानां महत्कष्ट मदृष्टचर मस्तियत् ।
तदेव भवता मग्रे व्यग्रेण मयकोच्यते ॥ २ ॥

ब्रह्मा—इन्द्र, व्यतीतो भवतो दुःखमयः समयः सम्प्रति न कष्टं भविष्यति । अद्य भगवान् विष्णु र्देवदेवंमहादेवं मिलितुंगत स्तत्रैवास्माभिरपिगन्तव्यम् ।

यत :—

विचार्य बहुभिर्बुध्या सुध्यातं किल कल्प्यते ।
यत्तदेव फलत्याशु कार्य मित्यवधार्यताम् ॥ ३ ॥

इन्द्रः—तथास्त्विति निष्क्रान्ताः सर्वे ।

(ततः प्रविशतो हरिहरौ ।)

विष्णुः—देव, कैलासवासिन् , यद्विषयेमन्त्रयन्तावावां वर्तावहे तत्साधुजातम् । यतोऽत्र स्वयमागतो भगवन्तं सुरज्येष्ठं पुरस्कृत्य सर्वदेवोपेतः पुरुहूतः ।

रितिध्वनयति । **इन्द्रमन्विति** । अनुर्लक्षणे इतिकर्मप्रवचनीयत्वाद्द्वितीयां । **सर्वज्ञोसीति** । तथाचनकथनापेक्षेत्यर्थः । **तथापि** भवदाज्ञानुरोधेनैत्यर्थः । **विचार्येति** । बुद्धया बुद्धिपूर्वकं बहुभिरितिसहार्थे तृतीया । सुध्यातंनिश्चितंयत्कल्प्यते क्रियते तदेवाशु फलति फलेन संपद्यते । **सुरज्येष्ठं** ब्रह्माणं **पुरुहूत** इन्द्रः ।

(सर्वे प्रविशन्ति)

ब्रह्मा—इन्द्र, अयमिह सुरासुरजिष्णु भगवान् विष्णुः तत्रभवता परमेश्वरेण किमपि मन्त्रयन् वर्तते ।

इन्द्रः—भगवन्, किमेतौमन्त्रयतः । न खलु विदितोऽयमसुरबाधा वृत्तान्तः स्यादाभ्याम् ।

ब्रह्मा—(सस्मितम्) किमीश्वराणां परोक्षम् ।

(समीपमागत्य सर्वे यथायथं नमस्कृत्योपविशन्ति)

(विष्णुरिन्द्रंप्रति पृच्छति सर्वे शृण्वन्ति ।

विष्णुः—इन्द्र, कस्कः खलु स्वर्गोपप्लवः कृतस्तेन दुष्टमहिषेन ।

इन्द्रः—देव, यद्यपि न किंचिदपि परोक्षं नाम भवतां तथापि यथास्ति कथयामि ।

ब्रह्मा—सर्वमपि तस्योद्वृत्तस्य वृत्तमभिधेयम् ।

इन्द्रः—भगवन्, परस्परं युद्धोन्मुखेषु वीरप्रमुखेषु महिषासुर-सैन्यं प्रति जन्यं कर्तुं समस्तं मया प्रशस्तं गतदैन्यं देवसैन्यं प्रहितम् । परन्तु प्रबलेन तद्बलेन सर्वास्माकं सेना दीनदीना बल

तत्रभवता पूज्येन, **परमेश्वरेण** शिवेन, परमेश्वरशब्दस्य शिववाचकत्वं श्रुति सिद्धम् । तथाच तैत्तिरीये— ईशानः सर्वविद्यानामीश्वरः ॥ श्वेताश्वतरेपि—तमीश्वराणां परमंमहेश्वरम् ।। **ईश्वराणां** सर्वज्ञत्वादिगुणशालिनाम् । **स्वर्गोपप्लवः** स्वर्गस्योपद्रवः, **परोक्ष** मविज्ञेयं, **तस्य** महिषासुरस्य, **उद्वृत्तस्य** मर्यादा रहितस्य, **वृत्तं** चरित्र **मभिधेयं** कथ्यताम् । **परस्परं** सेनाद्वयमध्ये **युद्धोन्मुखेषु** युद्ध करणाय सज्जेषु, **जन्य** युद्धं **प्रशस्त** श्रेष्ठ **प्रहित** प्रेषितम् । **तद्बलेन** महिषा

हीना कृता । अनन्तरं च कुलिशकलितपाणिरहमपि संग्रामाभिलाषेण रोषेण महताविष्टः प्रबलरुषा तेन द्विषा युद्धमकार्षम् । किन्तु मामपि स दुष्टमहिषः पराजितवान् । सत्यमुक्तं भगवत्या सरस्वत्या—

सबलो भवति सुदुर्बलो लब्ध्वा समयबलम् ।
प्राप्य तदेव हि दुर्बलो जेतुं सबलमलम् ॥ ४ ॥

विष्णुः—

तथ्यं प्रजल्पति भवान् खलु दानवारे,
मिथ्याप्रलापनकला प्रतिभाति नात्र ।
यत्नं चकार महिषासुर मारणाय
कालोन संवदति चेत्तत्र कोऽत्र दोषः ॥ ५ ॥

इन्द्रः—पुनश्च सः ।

मत्पुरी मुररीकृत्य दुष्कृत्य मिदमातनोत् ।
अमन्दनन्दनोद्यान मभञ्जदसमञ्जसः ॥ ६ ॥

सुरसैन्येन, कुलिशकलितपाणिः कुलिशो वज्रस्तेन कलितो युक्तः पाणिर्हस्तं यस्य सः। द्विषा शत्रुणा, सबल इति । सबलो बलवान् सुदुर्बलो बलरहितः । तदेव समयबलम्। अलं समर्थः । तथ्यमिति । तथ्यं सत्यं, मिथ्याप्रलापनकला, असत्यभाषणलेशोपि न भाति । कालः समयः संवदत्यनुकूलयति । स महिषासुरः पुरीममरावतीं, उररीकृत्य गृहीत्वा, इदं वक्ष्यमाणम्, दुष्कृत्यमातनो [illegible] अमन्दनन्दनवनं अभञ्जत् भाजत्वाटिनचान्द्रव्याकरणे, असमञ्जसो दुष्टः ।

किंच—

कल्पद्रुमात्मसात्कृत्य कामदां कामधेनुकाम् ।
स्वर्गस्त्रीणां कचग्राहं दुर्मतिः कर्तुमिच्छति ॥ ७ ॥

विष्णुः—ततस्ततः ।

इन्द्रः—

कत्यश्वान कतिधा नागान् कत्यनर्घ्यमणिच्छटाः ।
कत्यमूल्यदुकूलानि जगृहु स्तस्य नो भटाः ॥ ८ ॥
रुन्धते धनदागारं भिन्दते यमयातनाः ।
विचरन्ति यथाकामं हरन्ति विबुधाङ्गनाः ॥
किंनासन् दानवाः पूर्वे किंनस्वर्गस्य विस्रवः ।
परमाश्चर्यचर्यस्य तस्य कोपि समो नवै ॥ ९ ॥

संप्रति च तस्यायमाशयः ।

विष्णुः—(स्वगतम्) किमतः परमपि वदिष्यति ।

इन्द्रः—

वस्तव्यं वासवावासे विहर्तव्यं यथेच्छया ।
हन्तव्यं द्युसदां वृन्दं प्राप्तव्यं सकलं धनम् ॥ १० ॥

विष्णुः—(प्रकाशम्) पुरन्दर, परमेयं सीमा दौर्जन्यस्य ।

कल्पद्रुं कल्पवृक्षं, **आत्मसात्कृत्य** वलादगृहीत्वा । **नागान्** हस्तिनः, **अनर्घ्यमणिच्छटा** अमूल्य रत्नानि. **तस्य** महिषासुरस्य **भटाः** किंकराः, **धनदागारं** कुवेरगृहं देवनिधिमित्यर्थः । **रुन्धते** अरुन्धन, **यमयातनाः** पापिपुरुषैर्गन्तव्यस्थानानि **भिन्दते** व्यदारयन, **यथाकामं** यथेच्छं **विबुधाङ्गनाः** सुरस्त्रियः **हरन्ति** चोरयन्ति, अतीतंकृत्यंप्रदर्श्यसंप्रतिततोप्यनिष्टं कर्तुमिच्छतीत्याह · **संप्रतिचेति**

इन्द्रः—देव,

नो मे पराजय कृते विकृते र्लवोपि
यस्माज्जयो भवति किंच पराजयोपि ।
किन्त्वेष एव वहुशो मम शोकहेतुः
यत्स्त्रीकुलान्यपि वलात्स तिरस्करोति ॥ ११

विष्णुः—इन्द्र, अलमनया कथया । यतोहि—

कृता दुरात्मनां व्यर्था कथापि जनयत्यघम् ।
श्रेयस्कामयमानैः तज्जनैः सा परिहीयताम् ॥ १२

इन्द्रः—देव, नातः परं किमपि सारम् ।

सर्वेवयमतीवदुःखमापन्ना युष्माकमभूमप्रत्यासन्नाः ।
इदानीं तद्वधोपायचिन्ताभरः युष्मासु निर्भरः ।

विष्णुः—इन्द्र, अलमनया चिन्तया ।

विष्णौ मयि द्विषां जिष्णौ शङ्करे भक्त शङ्करे ।
वुद्धिश्रेष्ठे सुरज्येष्ठे चिन्ता सन्तापयेत्तु का ॥ १३ ॥

(निर्ध्याय) ननु विचारितो मया निरपाय स्तद्वधोपायः ।

विकृतेः मनोविकारस्य **लवोपि** लेशोपि, **यस्मादिति** । युधिशतकृत्वो विजयन्ते पराजीयन्ते च वीरा स्तत्र न विषादः । किं तर्हि विषादकारण मित्याह—**किन्त्विति** । **स** महिषासुरः, **तिरस्करोति** निर्भर्त्सयति, **अघं** पापं, **सा** कथा, **युष्मासु** ब्रह्म विष्णु महेश्वरेषु, **ननु** संबोधने **निरपायो** निर्विघ्नः ।

शङ्करः—विष्णो, कः खलूपाय स्त्वया समयानुकूलश्चिन्तितः ।

विष्णुः—भगवन्, त्वया मया ब्रह्मणा चान्यै र्देवै र्मिलित्वा स्वस्व तेजसा सहसा एकास्त्री सकलास्त्रिणी निर्मातव्या । तयोच स्त्रीरूपया शक्त्या स दैत्यपतिरवश्यं प्रतिकर्तव्यो भविष्यति ।

शंकरः—(ध्यात्वा) साधु हरे साधु सुष्ठु विचारितं भवता ।

विष्णुः—देव, तर्हि क्रियता मुपक्रमः ।

शंकरः—कृतं मया सुखसदनं स्त्रियो वदनम् । पश्यन्तु भवन्तः ।

(सर्वे सविस्मयं विलोकयंति ।)

यमः—अयमहं करोमि स्वतेजसा केशान् ।

विष्णुः—अहंच करोमि प्रवलं वाहुयुगलम् ।

सोमः—करोम्यह मतितिग्मं स्तनयुग्मम् ।

इन्द्रः—अहमुदरं करोम्यतिवरम् ।

वरुणः—अयमहं करोम्यतिघनं जघनम् ।

भूमिः—भवतु मत्तः सरागः नितम्ब भागः ।

ब्रह्मा—करोम्यहं दत्ताभक्तविषादौ पादौ ।

सूर्यः—अयमहं करोमि भक्तार्पितपुष्पांजली रंगुलीः ।

वसवः—कुर्मोवयं समस्ता हस्तांगुलीः ।

सकलास्त्रिणी सर्वशस्त्रसहिता **निर्मातव्या** विधातव्या, **प्रतिकर्तव्यः** हन्तव्यः **उपक्रमः** प्रारम्भः **स्त्रियोवदनं** स्त्रीमुखं **सविस्मयमिति** । क्रियाविशेषणानां कर्मत्व मिति द्वितीया । **यमो** धर्मराजः । **सोम** श्चन्द्रः, **भूमिः** तदधिष्ठातृ देवता, **सरागः** राग सहितः रागो रक्तिमा । **नितम्बभागः** कटिभागः, **अंगुलि** शब्दस्य

कुवेरः—नमे शङ्का नासिका करणे ।

वह्निः—अहं करोमि तेजोमयीं नेत्रत्रयीम् ।

सन्ध्ये—आवां कुर्वः कौटिल्यमयं भ्रूकुटिद्वयम् ।

वायुः—करोम्यहं भक्तार्थनाश्रुतिप्रवणे श्रवणे ।

शंकरः—विष्णो, सिद्धं वः समीहितम् ।

विष्णुः—भगवन्, शस्त्रदानं सम्प्रति सम्मानम् ।

शंकरः—अयमहं (ददाम्यस्यै) सकल रिपु नाशमूलं शूलम् ।

विष्णुः—अहं चातिवक्रं चक्रम् ।

इन्द्रः—अहं शत्रुरक्तमलीमसं कुलिशं तीव्रस्वनच्छटां घन्टाम् ।

सूर्यः—अहं सर्वरोमाभरणान् किरणान् ।

वरुणः—अहं चाति प्रेङ्खं शङ्खम् । शत्रुनिरासं पाशं च ।

वायुः—अहमतिदुष्प्रापं चापम् ।

वह्निः—अहमरिविरक्तिं शक्तिम् ।

यमः—अहं कृतारिखण्ड दण्डम् ।

समुद्रः—अहं च सौन्दर्यसारं हारं विजरे अम्बरे भासाधरीकृत द्युमणिं चूडामणिं हाटकमयं कटकद्वयम् । नपुरौ कर्णपूरौ निर्मलां मालां च ।

विश्वकर्मा—अहं कृतानेकनिरसुं परशुम् ।

स्त्रीत्वंकांशग्रामप्रभात् । **कौटिल्यमयं** कुटिलतापूर्णाम्, **श्रवणौ** कर्णौ, **कुलिशं** वज्रम्, **अतिप्रेङ्ख** महानादम्, **दुष्प्रापं** दुर्लभं, **शक्ति** शस्त्रविशेषम् । **दण्डं** कालदण्डं **विजरे** निर्मल **अम्बरे** वस्त्र **हाटकमयं** सुवर्णघटितं **कटक-द्वय** कंकणद्वयम्, **नपुरौ** मञ्जीरौ **कर्णपूरौ** कर्णभूषणौ **परशुं** कुठार,

हिमाचलः—अहं च निरालस्यं पंचास्यं चिरत्नानि रत्नानि च।
कुबेरः—अहमेकमात्रं सुगपात्रम्।
शेषः—अहं मुग्धाकारं नागहारम्।
(सर्वे देवीं दृष्ट्वा परमानन्दं विन्दन्ति)
ब्रह्मा—(हस्तमुद्यम्य) भगवति,

भवत्यै भवतु स्वस्ति निरस्तिः तव विद्विषाम्।
विबुधाः सन्तु सन्तुष्टाः त्वया हतविपत्तयः ॥ १४ ॥

किंच—यावत्सनातनो धर्मः यावच्चन्द्रदिवाकरौ।
तावद्गास्यन्ति कवयः तावकं विमलं यशः ॥ १५

अपिच–धन्यं जगति तज्जन्म धन्यंमान्यं च तत्कुलम्।
धन्यौ तज्जननीजन्यौ यस्त्वांभक्त्यार्चयिष्यति ॥ १६

देवी—परमनुगृहीतास्मि सर्वैरपि भवद्भिः।

प्रमोदनिद्रोपेतव्या गत्वा स्वं स्वं निकेतनम्।
निःशङ्कं स्वस्वपर्यङ्कं सम्प्रत्यध्यास्यतां भवत् ॥ १७

अहमपीदानीं प्रस्तुतकार्य साधनाय साधयामि।
इति निष्क्रान्ताः सर्वे। इति द्वितीयोऽङ्कः।

पंचास्यं सिंहं **एकमात्र** मद्वितीयं **मुग्धाकारं** सुन्दराकृतिम्। **उद्यम्योत्थाप्य** **भवत्यै** देव्यै **स्वस्ति** क्षेमं **भवत्वित्याशिषि लोट्।** **निरस्तिः** निराशः पराजय इतियावत्। **विद्विषा** मसुराणाम्। **विबुधा** देवाः, **चन्द्रदिवाकरौ** चन्द्रसूर्यौ, **तावकं** त्वदीयं, **धन्यं** धन्यवादार्हम्, **जननीजन्यौ** मातापितरौ, **अर्चयिष्यति** पूजयिष्यति, **निकेतनं** स्थानं **पर्यङ्कं** शय्याम **ध्यास्य, साधयामि** गच्छामि। इति दुर्गाभ्युदय नाटकसंकेते द्वितीयाङ्कविवरणम्।

अथतृतीयोऽङ्कः ।

(ततः प्रविशति इन्द्रो वृहस्पतिश्च)

इन्द्रः—गुरो, अस्मदागमानन्तरं भगवत्यादेव्या दुष्टमहिषादीनां वधायकथमुपक्रान्त मिति न ज्ञायते । (दक्षिणाक्षिस्पन्दनं सूचयित्वा ।) अये,

स्फुरितै र्दक्षिणं नेत्रमत्रकार्येऽनुकूलताम् ।
सर्वथा शंसतीवाद्य सद्यः सुरसमीहिते ॥ १ ॥

वृहस्पतिः—मघवन्, दिष्टया वर्धसे । यतश्च—

भवन्तं प्रतिवृत्तान्तं तत्रत्यं सकलं मुनिः ।
अयमाख्यातुमायाति सहसात्र विहायसा ॥ २ ॥

(प्रविश्य) नारदः—महेन्द्राज्ञया भगवतीपार्श्वे गत्वा समागतोऽस्मि । सम्प्रति दिवस्पति मुपसरामीति परिक्रामति ।

इन्द्रः—अये, महर्षिर्नारदः । तदासनमानीयताम् ।

(वृहस्पति रासनमानयति । नारद उपविशति ।

इन्द्रः—भगवन्, कथय कथमस्ति ।

स्फुरितै रिति । दक्षिणं नेत्रं स्फुरितैः स्फुरणैः भावेक्तः । सुरसमीहिते कार्ये सद्यो झटित्ययानुकूलतां संशतीव सूचयतीव । दक्षिणाङ्ग स्फुरणं शुभसूचकं यदुक्तं सामुद्रिक शास्त्रे—'वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिण इति ॥ **दिष्टयेत्यानन्दे** । **मुनिर्नारदः**, **अयमित्यङ्गुल्यानिर्देशः** । **विहायसा** आकाशमार्गेण, **दिवस्पति** मिन्द्रम्,

नारदः—मघवन्, प्रत्यक्षेणानुभूतमाचक्षे ।

साभगवती कृतदुष्टविषादं शंखनादं कृत्वा सकलमपि विकलयामास । किं बहुना तेन शब्देन अचला चलाभूत् समुद्रा निर्मुद्रा महीधरा श्चलनपरा आसन् । कुतोऽयं कस्यायं शब्द इति संदिहाना नाना देवदानवा भगवती पार्श्वं माजग्मुः । दृष्ट्वा च देवाः प्रसन्नावभूवुः । प्रत्यासन्नाश्च परमक्रुधा युद्धाय परः सहस्रमुत्कटा महिषादिभटाः ।

इन्द्रः—ततस्ततः ।

नारदः—ततश्च—

शस्त्रैर्वृतां कृतरुतां पदयोः क्रमेण
क्रान्तक्षितिं स्थितिमतीं गगनेपि दृष्ट्वा ।
तां सेवितां मुनिजनै र्महिषो दुरात्मा
स्वान् सैनिकानिति रुषा सहसा नुजज्ञे ॥ ३ ॥

इन्द्रः—कथमिव ।

नारदः—

रे चिक्षुर, त्वमधुना क्षुरवज्रवाजौ
रे चामर, त्वमधुना त्यज पामरत्वम् ।

आचक्षे कथयामि, **सकलमपि** भुवनमित्यर्थः । **अचला** पृथ्वी, **निर्मुद्रा** मर्यादारहिताः, **महीधराः** पर्वताः, **संदिहानाः** सन्देहंकुर्वाणाः, **प्रत्यासन्नाः** समीपस्थाः चकारेण वभूवुरित्यनुकृष्यते । **शस्त्रैर्वृतां** सर्वास्त्रसहितां **कृतरुतां** कृतंशखनादां **पदयोः क्रमेण** पादन्यासेन, **चिक्षुरेति दैत्यनाम** । शस्त्रविशेष क्षुरः उस्तरेति भाषायाम् । तद्वत्, **चामरेतिदैत्यनाम**, पामरत्वंलघुत्वम्, **आजौ**

युद्धं महाहनुवदुग्र मुदग्र, कुर्याः
त्वं वाष्कल, त्यज विड़ाल, च कालभीतिम् ॥ ४ ॥

इन्द्रः—ततस्ततः ।

नारदः—तदनु क्षणेनैव—

ते भिन्दिपालै मुसलैः पाशैः परशु-पट्टिशैः ।
देव्यां प्रहार माचक्रु र्बहुक्रूरैश्च तोमरैः ॥ ५ ॥

इन्द्रः—(सविषादम्) एवं सति किं कृतवती भगवती ।

नारदः—

देवी दिव्यानि शस्त्राणि तत्प्रयुक्तानि तत्क्षणम् ।
लीलयैव प्रचिच्छेद शत्रुच्छेदकृतोद्यमा ॥ ६ ॥

किंच—

विराजमाना समरे स्तूयमाना महर्षिभिः ।
असुरांस्ताडयामास गदया निर्दया सती ॥ ७

इन्द्रः—ततस्ततः ।

नारदः—देवराज, इदमत्र विचित्र मासीत् ।

इन्द्रः—किं नाम ।

नारदः—युद्धं कुर्वती भगवती यानसुरान् शस्त्रास्त्रैः भूमौ पातयामास ते सर्वपि पुनरुत्थायोत्थाय शस्त्राण्यादाय स्वैरेव सम मसमं युयुधुः ।

युद्धे, **उदग्रेति** दैत्यनाम, महाहनुना **दैत्येन** तुल्यंमहाहनुवत् **उग्रं** महद्युद्धंकुर्याः **बाष्कलेति बिड़ालेतिच** दैत्यनाम । ते दैत्याः **तोमरैः** शल्यैः शल्यंतु तोमर इत्यमरः । **तत्प्रयुक्तानि**दैत्यैः प्रेरितानि, **शस्त्राणि** भिन्दिपालादीनि, **लीलयैव** अनायासेनैव, **समरे** युद्धे, **अत्र** युद्धे **विचित्र** माश्चर्यम् । **युयुधुः** युद्धं चक्रुः ।

इन्द्रः—भगवतीशक्तिरेवात्र प्रभवति ।

नारदः—अथकिम् ।

इन्द्रः—ततस्ततः ।

नारदः—तदनन्तरं परं प्रहृष्टाः सन्तः ।

पटहान्वादयामासुः केचित्तत्र सुरारयः ।
परे मृदङ्गा नपरेऽसंख्यान्शङ्खां स्तथैवच ॥ ८ ॥

एवंसति ।

देवी पंचाननस्तेषु वनेष्विव हुताशनः ।
पर्यभ्रमद्धुतसटः प्रभूताक्रान्तदुर्भटः ॥ ९ ॥

तथाहि ।

कांश्चिन्निपातयामास मथयामास कांश्चन ।
कांश्चिदेकान्विचरणान् क्षणान्मध्येरणंव्यधात् ॥१०॥

किंबहुना—

सिंहेन पातितैरश्वै रसुरैश्च वसुंधरा ।
विलोक्यतेस्म तत्रत्या सर्वलोकभयङ्करा ॥ ११ ॥

अत्र विलक्षणघटनायाम्, **तत्र** संग्रामभूमौ **सुरारयो** दैत्याः, **मृदङ्गान्** वाद्य विशेषान, **असंख्यान्** बहून् । **देवीपंचाननो** देवीसिंहः **तेषु** दानवेषु **वनेषु** काननेषु **हुताशनो** वह्निरिव, **पर्यभ्रमत्** सर्वतोबभ्राम, धुताविक्षिप्तासटायेन । **मध्येरणं** [illegible] ... । **वसुंधरा** पृथ्वी, **तत्रत्या** संग्रामीया,

केचित्खलु—

पतिताः पुनरुत्थाय प्राणमादाय दानवाः ।
प्राद्रवन् दिक्षु विक्षुब्धा रणात्परमदारुणात् ॥ १२ ॥

इन्द्रः—एवं सति किं कृतवन्तः चिक्षुरादयः सेनापतयः ।

नारदः—चिक्षुरः कैश्चिदसुरैः परिवृतोऽखर्वेणगर्वेणविराजमानोमानोन्नतः क्रूरदृष्ट्या शरवृष्ट्या च देवीमाच्छिदत् ।

इन्द्रः—(सभयम्) ततस्ततः ।

नारदः—देव्यपि तत्प्रहितान् शरान् छित्वा धनु रनु भित्वा च तं चकारास्तम् ।

इन्द्रः—(सहर्षम्) ततस्ततः ।

नारदः—ततो महापामरः चामरः शूलमादाय देवीं प्रहृतवान् । देवी तु क्षणेनैव तच्छूल मुन्मूलयित्वा तं च मूर्च्छितं चकार ।

इन्द्रः—ततस्ततः ।

नारदः—तदनु महानुग्र उदग्रश्च देवीमुष्टितलात्प्रहृतः पलायितः । एवमेव कराल-विकराल-वाष्कल-विड़ाल-प्रभृतयोपि कृत युद्धविरतयो वभूवुः ।

अत्रान्तरे पश्यतां साधुवादेन सिद्धचारणगणानां पुष्पवर्षेण

पतिता भूमौ **प्राण** मसून् **विक्षुब्धाः** संत्रस्ता **अखर्वेण** महता, **तत्प्रहितान्** चिक्षुरमुक्तान **शरान्** वाणान्, **अस्तं** परास्तं चकार, **महापामरो** दुष्टः **मूर्च्छितं** मूर्च्छायुक्त **प्रहृत** स्ताड़ितः **पलायितः** प्राद्रवत, **करालेत्यादीनि** पर्यायि दैत्यनामानि । **अत्रान्तरे** अस्मिन्समयमध्येऽन्तरमवधिमध्ययोरितिरत्नमाला ।

च समराङ्गणं पर्यपूर्यत।

इन्द्रः—अहो देव्या धैर्यं गाम्भीर्यं चातुर्यं वीर्यं च यत्परः शत दानवा क्रान्तापि न श्रान्ता।

नारदः—तदनु दनुजाधिपति र्महिषासुरः संग्रामभूमि मागत्य—

सर्वसैन्यं मृतं मत्वा कृत्वा रूपं हि माहिषम्।
निराशः त्रासयामास, गणान् देव्या रणागतान्॥१३॥

तथाहि—

कांश्चि त्तुण्डेन मुण्डेन कांश्चि ल्लांगूलताडनैः।
कांश्चित् शृंगेण रिंगेण कांश्चित्पादविलोड़नैः॥१४॥

किंवहुनातस्यतदानीम्।

वेगेन भ्रमणात्क्षमापि परितः शीर्णा समालक्ष्यत
लांगूलेन विलोड़ितस्य जलधेरुल्लंघ्यवेलाययौ।
शृङ्गाभ्यामवलोड़िताः प्रतिययुः खण्डत्व मम्भोधराः
निःश्वासाभिहतामुहु र्निपतिता धात्र्यां धरित्रीधराः॥१५

इन्द्रः—(सविस्मयम) ततस्ततः।

नारदः—तदनु देवीधनुर्ज्याटङ्कारः दशाप्याशाः पूरयामास।

इन्द्रः—ततस्ततः।

समराङ्गणं समरभूमिः। **दनुजाधिपति** रसुरसम्रा्. **महिषः** प्रसिद्धः पशुः तदीयं रूपं **कृत्वा, निराशो** विजयाशारहितः। त्रासप्रकारमाह—**तथाहीति**। **कांश्चि** देवी गणानित्यर्थः। **तुण्डेन** मुखेन **मुण्डेन**मस्तकेन**शृङ्गेण** विषाणेन, **रिंगेण** [illegible] **तस्य** महिषासुरस्य **क्षमा**पृथ्वी**लांगलेन**पुच्छेन, **वेला** नीरं

नारदः—

तं क्रोधपूरिताक्षं दृष्ट्वा देव्यप्रयासेन ।
उत्पत्य खं ववन्ध लघ्वात्मीयेन पाशेन ॥ १६ ॥

इदं पुनरतुलं कुतूहलं तत्रालोक्यतेस्म ।

इन्द्रः—किं नाम ।

नारदः—दनुजेश्वरो महिषासुरो माहिषं वपुर्विहाय सिंहाकृतिं विधाय च देव्या सममसमं युयोध । यावद्देवी तं हन्तुं खड्गमसे विष्ट तावदकस्माद् विस्मापयन्नभूत्परुषः पुरुषः ।

इन्द्रः—ततस्ततः ।

नारदः—पुनश्च ।

यावद्भूत्वा युधिगजः स जगर्ज मुहुर्मुहुः ।
देवीतावत्तमस्त्रेण करेण रहितं व्यधात् ॥ १७ ॥

इन्द्रः—प्रियतरंनः । ततस्ततः ।

नारदः—तदनुमहिषदुष्टः स्वौजसातिप्रहृष्टः
निजवपुषि समास त्रासयन्सर्वलोकम् ।
मुहुरपि च ननर्द क्ष्मारजांसि ममर्द
प्रबलतरविषाणः पर्वतोच्चैः प्रमाणः ॥ १८ ॥

इन्द्रः—ततः किमकरोद्देवी ।

नारदः—(महाट्टहासं कृत्वा) सरोषमिदमाह ।

धात्र्यां पृथिव्यां **धरित्रीधराः** पर्वताः । **आशा** दिशः **तं** महिषासुरं **अप्रयासेन** कुतुकेनैव **ख** माकाश **मुत्पत्य** स्थित्वा **लघु** शीघ्र **मात्मीयेन** स्वेन **पाशेन** ववन्ध । **कुतुहल** माश्चर्यं, **परुषो** भयङ्करः । **गजो** हस्ती, **निज-वपुषि** महिषरूपे **समास** तिष्ठतिस्म, **क्ष्मारजांसि** भूरेणून्, **ममर्द** ।

रे मूढ त्वं तावदेव यावत्सुरां पिबामि ।
गर्ज तर्ज वा नन्तरं त्वां यमसद्म नयामि ॥ १६ ॥

इन्द्रः—ततस्ततः ।

नारदः—तदनु (परस्परं संबोध्य) भगवत्यसुरयोः महान्संपरायो भवितु मारब्धः । एतदन्तं रणवृत्तान्तं भवते निवेदयितु मागतोऽस्मि । (कर्णंदत्त्वा) मघवन्, श्रूयतां श्रूयतां कस्याय मतिप्रचण्डोध्वनिरनुश्रूयते ।

इन्द्रः—(श्रुत्वा) भगवन्, कस्यायंस्यात ।

नारदः—शचीवयस्य, इदमन्यदाश्चर्यं पश्य ।

इन्द्रः—किमिव ।

नारदः—(हस्तेन दर्शयन्) इदं सकल भुवन-भवन-गिरि-सरिद्सुर-सुर नर-नगर-रूपं जगत्कम्पितु मारब्धम् ।

इन्द्रः—कथमकाण्ड एव करालः प्रलयकालः समागतः ।

नारदः—(स्मृतिमभिनीय) आ ज्ञातम् । भगवती हेतिहतिनिपतितस्य महिषासुरस्य भवेत् ।

(आकाशे) भो भो देवाः प्रवर्तन्तां रङ्ग मंगलानि ।

दर्पोद्धतानसुर-चिक्षुरबाष्कलादीन्
निष्पीड्य सा भगवती तरसा विधाय ।

सुरां मदिरां **यमसद्म** यमालयं **नयामि** प्रापयामि, **परस्परं** महिषासुरो **देवीं** देवी **महिषासुरं, संपरायो** युद्धं **एतदन्त** मेतत्पर्यन्त मित्यर्थः । **निवेदयितुं** कथयितुं **शचीवयस्य,** शचीपते, **अकाण्डे** ऽनवसरे, **हेतिहतिः खड्ग** प्रहारः । **दर्पोद्धतान्** दर्पद्धतान् **बाष्कलादीन्** साभगवती **तरसा** बलेन

शून्यं जगन्महिषतः स्वबलोत्करेण
सर्वान् दिदृक्षति सुरांश्च सुरेश्वरेण ॥ २० ॥

(सर्वेश्शृण्वन्ति)

नारदः—मघवन्नाकर्णितं जातः सम्प्रति निर्णयः ।

इन्द्रः—अथकिम् ।

नारदः—तदेहि सकलसुरसमेता वावां कृतकार्या भगवती मवलोकयावः । इत्युभावपि निष्क्रान्तौ ।

(नेपथ्ये)

भो भो गणाः कथयत क्व वर्तते सा
देवी स्वभक्तजनताखिलताप हर्त्री ।
या चिक्षुरादिसहितं च कथावशेषं
कृत्वाऽद्य दुष्टमहिषं सुरसौख्यकर्त्री ॥ २१ ॥

देवी—(श्रुत्वा) ननु ज्ञायतां कोऽयमिति ।

(देवीपुरुषो निष्क्रम्य पुनः प्रविश्य च भगवति,येनायं सेना समेत आयाति ततो ज्ञायते कश्चिद् सुरोभवेत ।)

देवी—धिङ्मूर्ख, मत्करालकरवालविमलधाराजलमग्नानामसुराणां क्व सम्प्रति नामापि तन्नूनं कश्चनसुरोभवेत् ।

'तरसीवलरंहसीति विश्वः । **निष्पीडय** निहत्य **स्वबलोत्करेण** महिषासुराच्छून्यं जगत् **विधाय** च **सुरेश्वरेण** इन्द्रेणासमं **सर्वान्सुरान्** द्रष्टुमिच्छति। **दुष्टमहिषं** कथावशेषं कृत्वा **हत्वा, सुरसौख्यकर्त्री** देव दुःख हर्त्री **धिङ्मूर्ख,** धिगभर्त्सने निन्दायां च । **क्वास्ते** [illegible] **करवालः** खड्गः

स्तोत्र

इन्द्रः—(प्रविश्य) सर्वगुणप्रशस्ते भगवति देवि नमस्ते ।

देवी—(विलोक्य) देवराज, इदमासनं सभाजय ।

(सर्वो देवसमूहो महेन्द्रमभितः स्थितः ।)

इन्द्रः —(कृताञ्जलि र्भूत्वा)

देवि, त्वत्कीर्तिं न वै ब्रह्मा वक्तुमलम् ।
श्रीपति रथ गौरीपतिः किंवा भूरिबलम् ॥ २२ ॥
त्वं वै पुण्यवतां गृहे लक्ष्मीरूपधरा ।
हृदये प्रतिभाशालिनां बुद्धिः श्रेष्ठतरा ॥ २३ ॥
किन्ते वीर्यं वर्णया म्यसुरक्षय कारि ।
ब्रह्मविष्णुहरतोऽधिकं मत्तमानहारि ॥ २४ ॥
त्वं मुमुक्षुभि र्ध्यायसे मुक्तिहेतु रखिलैः ।
त्वामालोक्य न भूयते शत्रुमित्रबिकलैः ॥ २५ ॥
त्वं मेधा श्रद्धावतां नृणां मति प्रदा ।
पुण्यवतां पापात्मनां यथायथं फलदा ॥ २६ ॥
त्रिभुवनसारा यावदत्रभवती नाराधि ।
तावदपैति न सर्वथा जन्ममृतिव्याधिः ॥ २७ ॥
लोके भवति नरः सवै धनी कीर्तिपात्रम् ।
करुणाया यस्मि स्तवाप्यस्ति लेशमात्रम् ॥ २८ ॥

सभाजय अलंकुरु **श्रीपति** विष्णुः **गौरीपतिः** शङ्करः **वीर्यं** वलं **शत्रुमित्र विकलैः** शत्रुमित्राभ्यां द्वेषरागाभ्यां विकलैर्दुःखितैर्नभूयते । **नाराधि** नाराधिता, कर्मणिलुङ् । **अपैति** नश्यतीत्यर्थः । **करुणायाः** कृपायाः **आर्तः** पीडितः

स्मृता त्व मार्तैर्ध्वंससे सर्वदैव भीतिम् ।
स्थिरचित्तै र्ध्याता पुन र्दत्से शुभां मतिम् ॥ २९ ॥
कामधेनुचिन्तामणी कामितचिन्तितदौ ।
कल्पितदः कल्पद्रुम श्चरणौ ते ऽखिलदौ ॥ ३० ॥
संसृतिरूपविषद्रुमे रसवत्फलद्वयी ।
सत्संगतिरथ ते स्मृतिः पदयोर्भक्तिमयी ॥ ३१ ॥

देवी—शचीपते, प्रसन्नास्मिते स्तुतेः ।

गत्वा स्वस्थान मधुना स्वाराज्य मुपभुज्यताम् ।
यथा पुराधिकाराश्च त्वया देया दिवौकसाम् ॥ ३२ ॥

किंचान्यदापि यथासमयं स्मृताह मुपस्थास्यामि ।

इन्द्रः—(प्रणिपत्य) सर्वैः सह निष्क्रान्तः ।

देवी—अहमप्याद्यशक्तिं वन्दितुं साधयामि ।

इति निष्क्रान्ताः सर्वे ।

इति तृतीयोऽङ्कः ।

भीतैरितियावत् । **दत्से** ददासि, **चरणौ** पादौ पदंघ्रिश्चरणोस्त्रिया मित्यमरः । **संसृतिः** संसारः । **सत्संगतिः** विद्वत्संसर्गः, **ते** तव **पदयोः स्मृतिः**स्मरणम् **स्वाराज्यं** स्वर्गाधिपत्यसुखं, '**अर्थप्रसङ्गमादायपात्रनिर्गमइष्यते**' इत्यनुसंधायाह **इतिनिष्क्रान्ताःसर्वे** । इति दुर्गाभ्युदयनाटकसंकेते तृतीयाङ्क विवरणम् ।



अथचतुर्थोऽङ्कः ।

(ततः प्रविशति देवदूतः ।)

देवदूतः—आज्ञप्तोऽस्मि सर्वैरपि देवैर्यथा-देवल, सम्प्रतीन्द्रः कस्मिन्-स्थाने किं कुर्वन्नास्ते इति विदित्वा सत्वरमागच्छत्विति । तत्तेषा मनुज्ञा मनुतिष्ठामि । इति परिक्रामति ।

देवनन्दी— (प्रविश्य) स्वामिन् , देवदूतो देवलो विज्ञापयति विज्ञाप्यं मे किञ्चिदस्तीति ।

इन्द्रः—ननु प्रवेश्यताम् ।

देवदूतः—(प्रविश्य) अये, अयमिह महेन्द्रोपि किंचित्सशोक इव लक्ष्यते । अथवा—

इन्द्रस्यापि सुखं नास्ति तथ्यैवैषा जनश्रुतिः ।
यद्रागद्वेषतो प्येष प्रसीदति विषीदति ॥ १ ॥

तदेन मुपसरामि । इत्युपसृत्य) जयतु जयतु भगवान्मघवान् ।

इदानीं चतुर्थाङ्क प्रतिपन्नमर्थं सूचयितुं देवदूत प्रवेशमाह—ततः प्रविशति **देवदूत इति** । आज्ञप्तमर्थमाह-**यथेति** । **देवलेति** देवदूतस्यनाम । **आस्ते** तिष्ठति, **विदित्वा** ज्ञात्वा **सत्वरं** शीघ्र **मागच्छतु** । **तस्मात्तेषां** देवाना **मनुज्ञा** माज्ञा **मनुतिष्ठामि** संपादयामि, **इन्द्रस्यापि** अन्येषां तु कथैवकेतिव्यज्यते । **तथ्यैव** सत्यैव **जनश्रुतिः** किंवदन्ती लोकभणितिरितियावत् । **रागद्वेषतो** रागद्वेषाभ्यां सार्वविभक्तिकस्तसिः । **प्रसीदति** प्रसन्नोभवति, **विषीदति** दुःखीभव-

इन्द्रः—देवल, अस्ति कश्चिदपश्चिमो वृत्तान्तः ।

देवदूतः—स्वामिन्, अस्ति कोपि चिन्तारोपी देवसन्देशः तं स्वामी श्रोतुमर्हति ।

इन्द्रः—अवहितोऽस्मि ।

देवदूतः—

देव, सर्वे सुरगणाः कुवेरवरुणादयः ।
भवन्तं प्रति वृत्तान्तं मन्मुखा देन मूचिरे ॥ २ ॥

इन्द्रः—ननु शीघ्र मनूद्यताम् ।

देवदूतः—

शुंभेन च निशुंभेन वयं सर्वे निराकृताः ।
वलात्कारान्नोधिकारान् गृहीत्वा सकलानपि ॥ ३ ॥

इन्द्रः—सर्वथा विदित एवाह मनेन वृत्तेन ।

त्वमिदानीं शीघ्रमेव गत्वा मद्वचनादेवं ब्रूहि यदिन्द्रः सर्वानपि वः प्रतीक्षमाणस्तिष्ठतीति ।

देवदूतः—यथाज्ञापयति स्वामी । इति निष्क्रान्तः ।

(सर्वे प्रविशन्ति)

(परस्परं नमस्कृत्य यथोचित मुपविशन्ति च)

इन्द्रः—भो भो देवाः प्रतिशुश्रूषति मन्मनोयत सर्वैरप्यस्माभी राज

ति यथासंख्यमन्वयो वोध्यः । **अपश्चिमो** नवीनः **चिन्तारोपी** चिन्ताजनकः **ननु** संवोधने **अनूद्यता** मनुवादः क्रियताम् **वो** युष्मान् **प्रतीक्षमाणः** प्रतिपालयन् **प्रतिशुश्रूषति** स्वीकरोति, **राजराजगिरौ** हिमालयपर्वते, सर्वै रप्यस्मा

राजगिरौ गत्वा तपस्तप्त्वा च सैवभगवती दुर्गा स्वर्गालयदुःख हारिणी प्रसन्ना करणीया। सन्तुष्टा च सा दुष्टा नाशुविनाश्य पूरयिष्यति नो मनोरथान्। नान्यः कश्चिदुपाय स्तयोः प्रतीकाराय। (स्मृत्वा) किंचैतानिभगवतीवचनाक्षराणि-यदा यदादानवबाधाभवित्री तदातदाहं स्मृतासती भवत्सपत्ननाशं करिष्यामि। नहि च भगवती व्याहृति र्व्यभिचरितु मर्हति। (सर्वे सहर्षं भगवतीप्रकर्षं वर्णयन्तः परिक्रामन्ति।)

इन्द्रः——अय मागतः श्रीमान् हिमवान् गिरिः। विलक्षण मेतस्या रामरामणीयकम्।

(परिक्रम्य पुरतोऽवलोक्य च) किंचात्रैव वहति।

सैषा भगवती गङ्गा पूतांगाः स्नानतो यतः।
संसाराब्धि मनायासं दुस्तरं संतरन्ति हि॥ ४॥

किंच-**गोविन्दचरणाम्भोजपूताया महतोभयात्।**
यस्या जलस्पर्शमात्रा दात्मानं त्रायते जनः॥ ५॥

(पुनरन्यतोऽवलोक्य) अहो एषा पर्वतस्थली किमपि विमलीकरोति चेतो यतो मुहुरवलोकितापि न चक्षुरकौतुकं करोति। तदिहैव भगवती हैमवती स्तोतव्या। सर्वे निश्चलाङ्गा गंगाजले नाचम्य स्तुवन्ति।

भिर्देवै, गत्वा भगवती **दुर्गा** शरणीकरणीया, **व्याहृति** र्वचनं **आरामरामणीयक**मुपवनसौन्दर्यम्, **सैषा** लोकवेदप्रसिद्धेत्यर्थः। भगवती **गङ्गा**त्रवहति। यत्र स्नानमात्रेण पूताङ्गाः सन्तो दुस्तरं संसार सागर मनायासं **तरन्ति**। **किंच** गोविन्द चरणाम्भोजपवित्रायाः यस्या गङ्गाया जलस्य स्पर्शमात्रेणजनोमहतोभयात्संकटादात्मानं **रक्षति**। **विमलीकरोति** पवित्रयति **चेतो** मनः यस्मान्मुहु**रवलोकिता**

जय जय महिषमहासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।
जय जय भक्तविपत्तिविनाशिनि शंभुविलासिनि पतिव्रते॥६॥
जय जय दिव्यसुधाकरवदने जय जय कुन्दोज्ज्वलरदने ।
जय जय जितचरणद्युतिमदने जयजय कृत दुर्मदकदने ॥ ७॥

इन्द्रः—(कर्णं दत्त्वा) अये, कथमिवास्मत्कथनानन्तरमेवमणिरणितानुकारी चेतोहारी कोपि कलकलः समुल्लसति ।

(विभाव्य) नून मेतया गंगास्नानार्थमागतया कयाचिदबलया भवितव्यम् । तदल मितो द्रष्टुं ।

(नेपथ्ये) भो भो देवा एषाहं महामाया निरपायाभिः स्तुतिभिः प्रसन्नास्मिजाता । तदल मनेन तपः क्लेशेन ।

इन्द्रः——कथमियं भगवती । तदालोकयामितावत् ।

सर्वेदेवाः——देवराज, केयं सुवर्णाभवर्णा मूर्तिमतीव द्युतिरायाति ।

इन्द्रः——भो देवाः सैवास्माकं दुःखहारिणी महिषासुरदारिणी भगवतीयं सर्वानपि नो मनोरथपूर्त्या संभावयिष्यति ।

(ततः प्रविशति भगवती ।)

(सर्वे बद्धाञ्जलयो भूत्वा गायन्ति)

दृष्टापि चक्षु र्नेत्रम् । हैमवती पार्वती, कलकलो मधुरशब्दः समुल्लसत्याविर्भवति । तदलमिति । इयं परस्त्रीत्वा न्नद्रष्टव्येत्यर्थः । निरपायाभिः पवित्राभिः कथ मित्याश्चर्ये । सुवर्णाभवर्णा कनकवर्णाङ्गी द्युतिः छविः 'शोभा कान्तिर्द्युतिःछविरित्यमरः । संभावयिष्यति सत्करिष्यति, नोऽस्मान्देवान्

नमस्ते शरण्ये त्रिलोकीवरेण्ये महाधन्यधन्येमहेशादिमान्ये ।
नमस्ते कराले महामुण्डमाले कृपालेशतःपातु नो भीतिकाले ॥८

इन्द्रः—अभिवाद्यसे त्वमद्य ब्रह्माद्यमरस्तुते देवि ।
अभिवांच्छितं प्रसिध्यतु पार्वतिन स्त्वत्प्रसादेन ॥९॥

देवी—देवराज, ज्ञातो मया सर्वोपि युष्माक मभिप्रायः ।
गच्छन्तु भवन्तः सर्वेपि निजावासंनिराशङ्कम् ।

पूर्वं विधाय महिषं च कथावशेषम्
त्रातं यथा त्रिभुवनं भवदाज्ञया मे ।
शुंभात्तथाद्य रहितान्यसुरा न्निशुंभा
ज्जम्भारिसूदन, भवान् भुवनानि वेत्तु ॥ १० ॥

इन्द्रः—तथास्तु । इति सर्वैः सह निष्क्रान्तः ।

(ततः प्रविशति चण्डो मुण्डश्च)

एकः—सखे मुण्ड, निसर्गरमणीयो हिमालयो नामायं पर्वतः ।

मुण्डः—सखे चण्ड, अतएवायं नगाधिराज उच्यते । पश्य—

विहगध्वनिकैतवादयं कुरुते स्वागत मागतस्य वै ।
अथभृङ्गरुतेतिभाषते स्वसमीहा सद्दगस्तु वस्तु ते ॥ ११ ॥

पातु रक्षतु, **अभिवाद्यसे** प्रणम्यसे **नो**ऽस्माकं **अभिप्रायो** मनोरथः **निजावासं** स्वस्वस्थानम् । **कथावशेषंविधाय** हत्वा **त्रातं** रक्षितं **मे** मयानिपातीयम् । **जम्भारिसूदन** जम्भाख्यमरिं सूदयतीतिजम्भारिसूदन, इन्द्र, **तथास्त्वति** स्वीकारे । **निसर्गरमणीयः** अकृत्रिम सौन्दर्यः । **अयं** हिमालयः **भृङ्गरुता** [illegible] विहगादि ध्वनिः स्वागतादि रूपेणोत्प्रेक्षितः । **अति-**

चण्डः—सम्यगुत्प्रेक्षितं भवता। इतोऽप्यक्षि निक्षिप। केयं सौभाग्यमयीव सालभञ्जिका सौन्दर्यदेवतेव शरीरिणी अस्य शिखरिणः शिखरे विलोक्यते।

अहोरूप महोधाम अहो अस्या नवं वयः।
नून मस्पृष्ट पूर्वेयं देवै रथ च दानवैः॥ १२॥

किंच—वल्गुना केशभारेण मुखचन्द्रेण भास्वता।
मनोहरेण हारेण मथ्नन्तीव जगन्मनः॥ १३॥

अपिच—उत्फुल्लमल्लिकामालां बिभ्रता शुभ्रवक्षसा।
मन्दहासावलोकेन मन्मथस्यापि मन्मथा॥ १४॥

मुण्डः—सखे चण्ड, सुष्ठु भणसि, विलक्षणरूपैवैषा योषा। को नाम खल्वेतां दृष्ट्वा न प्रसाद मासादयेत्।

चण्डः—तदागच्छ, गच्छावो वृत्तमिदं स्वामिने निवेदयितुम। इति निष्क्रान्तौ। इति चतुर्थोऽङ्कः।

निक्षिप, पश्येत्यर्थः। **सालभंजिका** गुडियां इति भाषा, **शिखरिणः**पर्वतस्य **अहोरूपं** सौन्दर्यं **धाम** प्रतापः, **वल्गुना** सुन्दरेण, **भास्वता** देदीप्यमानेन **शुभ्रवक्षसा** वक्षस्थलेन **मन्मथस्य** कामदेवस्यापि **मन्मथा** मोहयित्री, **भणसि** कथयसि, **योषा** स्त्री, **प्रसाद** मानन्दं **आसादयेत्** प्राप्नुयात्। इति दुर्गाभ्युदय नाटक संकेते चतुर्थाङ्क विवरणम्।



अथपञ्चमोऽङ्कः ।

(ततः प्रविशति प्रतीहारः)

प्रतिहारः—चण्डमुण्डौ हिमालयोद्देश दर्शनार्थं गतौ चिरयतः। शुम्भो महाराजश्च तौ किमपि प्रष्टुकामः । समादिष्ट' श्चास्मि तेन यथा—धूम्राक्ष, अद्य चण्ड मुण्डौ हिमालयं द्रष्टुं गतौ स्वस्थाने समागतौ नवेति ज्ञात्वा त्वरित मागच्छ। तत्तदा ज्ञा, मनुतिष्ठामि । परिक्रामन्नग्रेदृष्ट्वा । अये, इमौ चण्डमुण्डौ स्वामिनं द्रष्टु मितएवागच्छतः। तत्प्रतिनिवृत्य स्वामिने सूचयामि । इति तथा करोति । ततः प्रविशति चण्डो मुण्डश्च ।)

उभौ—विजयतां महाराजः ।

शुंभः—(दृष्ट्वा) चण्डमुण्डौ, कथमिव भवन्तौ कमपि हर्षप्रकर्ष मनुभवन्तौ विलोक्येते ।

उभौ—महाराज, अस्ति किमपि कारणम् ।

शुंभः—किं नाम ।

चण्डः—अस्ति काचन सर्वजनतोषा, अपरेव सितपक्षदोषा, स्त्री मात्र कान्तिमोषा योषा ।

मुण्डः—अहन्तु मन्ये—

इमं कर्तुं चन्द्रमसं तद्वक्त्र सदृशं विधिः ।
पक्षद्वितयभेदेन करोति विकरोति च ॥ १ ॥

सितपक्षदोषा शुक्लपक्षरात्रिः 'दोषा नक्तं च रात्रा वितिविश्वः । **योषा**—स्त्री, **अहंतुमन्ये** संभावयामि **विधि** र्ब्रह्मा चन्द्रमसं भगवतीमुख सदृशं कर्तुं शुक्लपक्षे **करोति** परन्तु न सदृशं दृष्ट्वा पुनः कृष्णपक्षे **विकरोति** खण्डयति । अद्यावधि

शुंभः—किमत्र साम्प्रतम् ।

मुण्डः—भवान् सर्वरत्नानां भाजनम् । अतश्च—

नाशयन्तीमदंस्त्रीणां भासयन्तीहिमाचलम् ।
स्त्रीरत्नमनवद्याङ्गी किमङ्गीक्रियते न सा ॥ २ ॥

शुंभः—यद्येवं तर्हि शीघ्र माहूयतां सुग्रीवनामा दूतः ।

चण्डः—तथास्तु-इतिनिष्क्रान्तः ।

दूतः—(प्रविश्य) जयतु जयतु महाराजः ।

शुंभः—सुग्रीव, त्वया हिमाचले गत्वा मद्वचना त्तत्रभवती देवी एवं वक्तव्या । त्रिलोकीश्वरः शुंभोनामासुरः भवत्यै सप्रेम सन्दिशति—यदहं त्रिभुवनानिजितवानस्मि । सर्वानपि च यज्ञभागानुपाश्नामि। सर्वेपीन्द्रादिसुरा मदाज्ञाकराः। सर्वाणि च तेषां रत्नानि मयापहृतानि । त्वं च नूत्नं स्त्रीरत्न मिति वांच्छामि ।

दूतः—(श्रुत्वा) यथादिशति महाराजः । इति निष्क्रान्तः ।

देवीपुरुषः—(प्रविश्य) भगवति, द्वारि स्थितः कश्चन विज्ञापयति देव्यै विज्ञाप्यं मे किञ्चिदस्तीति । परन्तु न ज्ञायते कोयं कुतोऽयं गूढचरो वा कश्चित्सन्देशहरोवा ।

देवी—ननु प्रवेश्यताम् । (देवीपुरुषो निष्क्रम्य पुनः तेन सह प्रविश्य इत इतो भवान् ।

साम्यं न प्राप कथमन्यथा प्रतिपत्तदारभ्यीयते वर्धते चन्द्रः । **साम्प्रतं** युक्तम्, **स्त्रीणां मदं** कमनीयतामदम् , **तत्रभवती** हिमाचले वर्तमाना , **अस्ति** भवति वर्त्तति विद्यतयः समानार्थाः । **त्रिलोकीश्वरः** त्रिलोकाधिपतिः । **शुंभोनामे**त्यत्र नाम प्रसिद्धौ । **सन्दिशति** सन्देशोवाग्वाचिकम् । **उपाश्नामि** भुंजे **यथादिशति** यथाज्ञापयति, **गूढचरो** [illegible] **सन्देशहरो** दूतः **ननु** संबोधने ।

दूतः—(देवीमवलोक्य) इयं सा देवी, विविक्तस्थाने तिष्ठति । तदेना मुपसरामि । इति तथाकरोति ।

देवी—(वीक्ष्य) भद्र, कुतस्त्वमायातः ।

दूतः—देवि, शुंभस्वामि सकाशा दागच्छामि ।

देवीः—कः खलु शुंभः ।

दूतः—अस्ति शुंभोनाम महाप्रभावो महासुरः ।

देवी—(स्मरणमभिनीय) अस्ति । श्रूयते ।

दूतः—तस्य सकलभुवनपरिवृढस्य दूत माकलय माम् ।

देवी—किमाह शुंभः ।

दूतः—श्रूयताम् । स खलु महाराजः चण्डमुण्डनामक भृत्याभ्यां त्वां स्त्रीकुलशेखरमणिं रमणीं विज्ञाय विज्ञापयति—यदहं त्रिभुवनानि जितवानस्मि । (पूर्वोक्तं पठति) मम मत्कनीयसो निशुम्भस्य वा पट्टमहिषी भूत्वात्वं परमानन्दं विन्दस्व ।

देवी—(सस्मितम्) दूत, सुष्ठ ते भणितम् । त्वमिदानीं शीघ्रमेव गत्वा मद्गिरा निजमहाराजाय सूचय ।

खलचरित निकृष्ट दुष्टबुद्धे किं वहुलेन वलेन लोभसे माम् ।
सकलखरबलिष्ठमप्यनिष्टं किं ममरगौः खरमीहते कदाचित ॥३॥

विविक्तस्थाने एकान्तमण्डपे **वीक्ष्य** दृष्ट्वा **सकलभुवनपरिवृढस्य** सकलभुवनपतेः **दूतं** सन्देशहरं **मा माकलय** जानीहि **भणितं** वचनम् **मद्गिरा** मद्वाचा 'गीर्वाक् वाणी सरस्वतीत्यमरः । **सूचय** कथय, **खलचरितादीनि** त्रीण्यपि संबोधनानि । **मां** देवीं **लोभसे** प्रलोभसे, **अनिष्टं** स्वानभीष्टं **अमरगौः** [illegible] कदाचिन्नैवेत्यर्थः । [illegible] **खर** ग[illegible]म**मीहते** [illegible]

किंच—

निशाचरोऽसुरोवास्तुनरो वा किंनरोऽथवा ।
योमां जेष्यति संग्रामे भर्ता मे स भविष्यति ॥ ४ ॥

दूतः—(स्वगतम्) अहो, स्त्रियोप्यस्या ईदृशी धृष्टता । यत्सकलभुवनजयिनं स्वामिनं शुंभ मेव मधिक्षिपति । तदतःपरं न सहिष्ये । (प्रकाशम्) आ वृथाभिमानिनि देवि ।

प्रतिकूलविधिस्तवाधुना यदिदं जल्पसि मत्प्रभुंप्रति ।
क्व सवै रणदुर्मदोभटः क्वचन त्वं नवपल्लवाकृतिः॥५॥

किंच—

इन्द्रोपि न पुरः स्थातु मलं शुंभनिशुंभयोः ।
ययोस्तौ कथयन्त्येवं लज्जसे किं न बालिशे ॥ ६॥

देवी—दूत, गत्वा स्वामिने सूचय, मा बहुकथय ।

दूतः—त्वया मयोक्तया गन्तव्य मन्यथाऽवहेलनया नयामि ।

देवी—(स्वगतम्) अहो, धृष्टता दुष्टदूतस्य, तदेनं निजमूर्त्यैव तावद्भीषयामि ।

(इतिकालिकारूपं कृत्वा) प्रकाशम् । आः तिष्ठ दुष्ट, स्वस्याविनयस्य फलमनुभव । इति खड्गमुत्थापयितुमिच्छति ।

देवीपुरुषः—भगवति ! अभयं शरणागतस्य विशेषतो दूतस्य ।

दूतः—(कालिकारूपं दृष्ट्वा) ससम्भ्रमं स्खलनमभिनीय निष्क्रान्तः ।

(ततः प्रविशति शुंभः चण्डश्च)

शुंभः—चण्ड, चिरंखलुकालो देव्याः सकाशं गतस्य सुग्रीवस्य,

निशाचरो राक्षसः **असुरो** दानवः **नरो** मानवः **किंनरो** गन्धर्वः **अधिक्षिपति** निन्दति, **स** शुंभः **त्वं** देवी, **पुरोग्रे**, **बालिशे** मूर्खे, [illegible] **आः** कोपे, [illegible]पाण्डित्यारित्यमरः । **चिर** मित्यव्ययम् ।

नाद्यापि आगच्छति । (वामाक्षिस्पन्दनं सूचयित्वा) साशङ्कम्।

नूनं कार्य मकृत्वैव सुग्रीवः संगमिष्यति ।
स्फुरताऽनेन वामेन चक्षुषा मम सूच्यते ॥ ७ ॥

चण्डः—स्वामिन्, नाय मेकान्ततो नियमः ।

स्वप्नं च शकुनं चैव सत्यं जानातु मा भवान् ।
यतस्ते वस्तुतः काकतालीयं ददतः फलम् ॥ ८ ॥

दूतः—(प्रविश्य) अय मिह महाराजः तिष्ठति । तदेनमुपसरामि ।
इति तथाकरोति ।

शुंभः—(विलोक्य) अये, सुग्रीवोऽयं प्राप्तः । सुग्रीव, दूरात्समागतोऽसि समास्व ।

दूतः—ननूपविष्टोस्मि ।

शुंभः—सुग्रीव, कथय कथमभूत् ।

दूतः—देव, तत्कार्यं न समपद्यत ।

शुंभः—किं तया मदुक्तं न स्वीकृतम् ।

दूतः—अथकिम् ।

शुंभः—किमाह सा ।

दूतः—तदप्यवाच्यम् ।

शुंभः—नहि नहि यदुक्तं गुह्य मगुह्यं वा तदेव विशकलय्य कथय, सन्देहं च श्लथय ।

संगमिष्यति आयास्यति **वामेन** प्रसव्येन प्रतीपेनवा, निद्रामुपेतस्य विषयानुभवः **स्वप्नः** शकुनपदार्थः प्रसिद्धः । **काकतालीयं** न्यायः **समास्व** उपविश, न **समपद्यत** न सम्पन्नम्, **तया** देव्या **अथकिं** नैवस्वीकृत मित्यर्थः । **अथकिं** स्वीक्रियार्थकमिति भरतः। **अवाच्यं** कुवाच्यत्वान्न वक्तव्यमित्यर्थः । **विशकलय्य**

दूतः—यथाज्ञापयति महाराजः । (खलचरित इति) (निशाचरोऽसुरोवास्तु) इति च पूर्वोक्तं पद्यद्वयं पठति ।

शुंभः—(शोकवांल्छोकद्वयं श्रुत्वा) सक्रोधम् । कः कोत्र भोः ।

दौवारिकः—(प्रविश्य) आज्ञापयतु महाराजः ।

शुंभः—रक्ताक्ष, धूम्रलोचन स्तावदाहूयताम् ।

दौवारिकः—तथास्त्विति, निष्क्रम्यधूम्रलोचनेनसह प्रविश्य एषस्वामी तिष्ठति । उपसर्पतु भवान् ।

धूम्रलोचनः—(उपेत्य) जयतु जयतु महाराजः ।

शुंभः—धूम्रलोचन, त्वया बहुसेनया हिमाचले गत्वा केशेषु गृहीत्वा सा दुष्टदेवी शीघ्र मानेतव्या । यदि कोपि नाम तद्रक्षणार्थं मुत्तिष्ठेत् निःसन्देहं स हन्तव्यः ।

धूम्रलोचनः—देव, कः खलु खपुष्पायितः शशशृङ्गायितश्चास्तियस्तां रक्षेन्मत्समक्षे सपद्यानयामि ।

इति निष्क्रान्तः ।

(नेपथ्ये) भोभो देवीगणाः चेतयध्वम् चेतयध्वम । नन्वयं—

शुंभाज्ञप्तः क्रुधारक्तः प्रबलो धूम्रलोचनः ।
सेनया सम मायाति न जाने किं विधास्यति ॥९॥

धूम्रलोचनः—(प्रविश्य) भो भोः संमुखीनाजनाः कसा देवी । (सरोष विकटं परिक्रम्य) देवीं विलोक्यच । भोभो मदनुचरा असुराः ।

एषा सन्तिष्ठते देवी यां समानेतुमागताः ।
शीघ्रता मवलम्ब्यैव गृह्यतां गृह्यतामिति ॥ १० ॥

स्पष्टं **श्लथय** दूरीकुरु, **रक्ताक्षेति** दौवारिकस्यनाम । **अय**मतिसंनिकृष्टः **क्रुधारक्तः** क्रोधेनरक्तवर्णः । **संमुखीनाजनाः** [illegible] सन्तिष्ठते वर्तते यां

(सर्वांन् ग्रहीतु मुद्यतान्निवार्य प्रथम मथवैवं वदामि)

देवि, त्वं गच्छ शुंभान्ते प्रीत्यैव कथयामि ते ।
नोचेदाकृष्य नेष्यामि बलात्त्वामबलामहम् ॥ ११ ॥

देवी—यथा भवते रोचते ।

धूम्रलोचनः—(समीपमुपसृत्य) ग्रहीतुमिच्छति ।

देवी—सरोषमुत्थाय खड्गेन प्रहरति ।

(ततः प्रविशति सम्भ्रान्तो महाहनुः)

शुंभः—(दृष्ट्वा) महाहनो, कथं सम्भ्रान्तोऽसि ।

महाहनुः—भवते निवेदयितुं शीघ्रमागतोस्मियतः ।

शुंभः—किंनाम सेनासमेतेन धूम्रलोचनेन पश्चादानीयतेदेवीति ।

महाहनुः—स्वामिन्, क्व सम्प्रति धूम्रलोचनः ।

शुंभः—किमस्तं जगाम धूम्रलोचननाम ।

महा०—अथकिम् ।

शुंभः—हा सेनापते धूम्रलोचन इति शोचति ।

महा०—देव, सम्प्रति शंकितव्यं प्रतिविधातव्यं वा ।

शुंभः—आः किमिह शङ्कया प्रतिविधानेन वा परमिदमाश्चर्यं मे यत्कथमेकयास्त्रिया ससेनो धूम्रलोचनः पराजितः ।

महा०—देव, देव्या केसरिणा च ।

देवीं समानेतुमागता **वयमिति शेषः** । **शुंभान्ते** शुंभसमीपे **हा** विषादे, हा विस्मयविषादयोरिति विश्वः । **शङ्कया** अनिष्टागमोत्प्रेक्षया, **प्रतिविधानेन** प्रतिकारेण, **केसरिणा** सिंहेन, सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरीहरिः, इत्यमरः ।

शुंभः—केसरिणा किं कृतम्।

महा०—देव्या खड्गेन धूम्रलोचनः केसरिणा दन्तप्रहारैः सेना च।

शुंभः—(उच्चैः कः कोऽत्र भोः।)

दौवारिकः—(प्रविश्य) किमादेशो देवस्य।

शुंभः—चण्डमाह्वय मुण्डं च। (दौवारिको निष्क्रान्तः)

(ततः प्रविशतः चण्डमुण्डौ)

शुंभः—(विलोक्य) सकोपाटोपम्।

हे चण्ड हे मुण्ड बलैः प्रबलैः सार्धमञ्जसा।
दृष्टा भवद्भ्यां या दुष्टा ऽनेया सिंहं निहत्य सा॥१२॥

चण्डमुण्डौ—यथाज्ञापयति स्वामी। इति निष्क्रान्तौ।

शुंभः—अहमपि सर्वमिदं निशुंभाय कथयितुं गच्छामि। इतिमहाहनुनासहनिष्क्रान्तः। (इतिनिष्क्रान्ताः सर्वे।)

इतिपञ्चमोऽङ्कः।

किमादेशः काज्ञा, **दौवारिको** द्वारपालः। **बलैः** सैन्यैः **प्रबलै** रुत्कृष्टबलैः **अञ्जसा**शीघ्रं 'अञ्जसातत्व शीघ्रयो रिति विश्वप्रकाशः। **आनेय**। मत्पार्श्वमानेतव्या, **पञ्चमोऽङ्कइति**। अङ्कनिर्वचनंनाट्यशास्त्रे—"**अङ्कइति**रूढिशब्दोनानाभावैरसैश्चयुक्तत्वादिति। इति दुर्गाभ्युदयनाटकसंकेते पञ्चमाङ्क विवरणम्।



अथषष्ठोऽङ्कः ।

(नेपथ्ये कलकलः)

(प्रविश्य)

पिशाची—अरे रुधिरप्रिय, कीदृशोऽयं शब्दः श्रूयते ।

पिशाचः—रक्तपे, देवीं मानेतु मागताना मसुरभटाना मेषघोषः ।

पिशाची—(सहर्षम) तदागच्छ, आवामपि, भगवतीशस्त्रनिपतिता ना मेषां रुधिरं पास्यावः ।

पिशाचः—तथास्तु ।

(नेपथ्ये पुनः कलकलः)

पिशाची—रुधिरप्रिय, पुनारवः श्रूयते ।

पिशाचः—(नेपथ्याभिमुखमवलोक्य) नन्वेतौ बहुसेनासमेतौ चण्डमुण्डा वागच्छतः । कदाचिदावामपिताड़यिष्यतः इत्यन्यत्र गच्छावः । इति निष्क्रान्तौ ।

(इति प्रवेशकः)

(ततः प्रविशतः चण्डमुण्डौ)

चण्डमुण्डौ—रेरे, देवीरक्षा-पक्षपातिनः तिष्ठत तिष्ठत, कृतमस्मद्दर्शन साध्वसेन ।

यया पुराभिमानेन शुंभदूतस्तिरस्कृतः ।
ससेनो मारितश्चाद्य प्रवलो धूम्रलोचनः ॥ १ ॥

घोषः शब्दः **एषा** मसुराणां **रवः** शब्दः **प्रवेशकइति** ॥ प्रवेशकोभवेदत्तनीच पात्र प्रयोजित इति ॥ **अस्मद्दर्शनसाध्वसेन** भयेन कृतमलं नास्माकं भयं किमपि कर्तव्यमित्यर्थः । [illegible] इति भावः । **पुरा** पूर्वं **ससेनः**

तामेवानेतुमधुना चण्डमुण्डौ समागतौ ।
भवद्भिः सहसा वाच्यं कुत्र सा सम्प्रति स्थिता ॥२॥

देवीपुरुषः—(सहसोपसृत्य) देवि, श्रूयतां श्रूयताम् ।
महानेष कलकलः समुज्जिहीते । समन्ततः सन्तमसम भवच्च ।

देवी—लामकायन, धूम्रलोचनवधात्क्रुधाशुंभप्रेरितौ ससेनौ चण्डमुण्डा वेनौ प्राप्तौ । तदहमप्यधुना दुष्टदलदलनार्थ मुद्यता भवामि । इति यथोचितं तिष्ठति ।

देवी—(शंखनादं कृत्वा) उभौ दृष्ट्वाच) रे रे चण्डमुण्डौ, अलमलं वहुविकथ्य । इयमस्मि, शीघ्रमागत्य भस्मीभूयतां, मत्क्रोधाग्नौ ।

चण्डमुण्डौ—(समीपमुपसृत्य) ग्रहीतुमिच्छतः ।

देवी—(खड्ग मादाय) चण्डमनुधावति मुण्डं च ।

(प्रविश्य)

शुंभः—(नेपथ्याभिमुखमवलोक्य) कः कोत्र भोः ।

विरूपः —(उपसृत्य) जयतु जयतु महाराजः ।

शुंभः—विरूप, कश्चिदागतः समरतः ।

विरूपः—(अभितोदृष्ट्वा) देव, दिष्ट्या वर्धसे ।
अयमनुप्राप्तो धूम्रकः ।

सेनासहितः **मारितो** हतः **तामेव** देवीमिति शेषः **भवद्भिः** देवीगणैः **वाच्यं** वक्तव्यं **सा** देवी सम्प्रति कुत्रास्ते । **समुज्जिहीते** उत्तिष्ठति **समन्ततः** सर्वतः **सन्तमसं** महान्धकारः **रहस्ये**कान्ते, **विकथ्य**...एसीयाकृत्वा **समरतः**

शुंभः—(विलोक्य) धूम्रक, सत्यं रथस्त्रोटितो देव्या चण्डमुंडयोः ।

धूम्रकः—देव, न केवलं रथो मनोरथोपि ।

शुंभः—(दीर्घं निःश्वस्य) किमसंभवं सम्भावयसि ।

धूम्रकः—देव, कथमसंभवंमन्यसे । श्रृणु—प्रथममद्यचण्डवध स्ततो मुण्ड इत्यर्धोक्ते विरमति ।

शुंभः—हा वीरौ, चण्डमुण्डा वितिमूर्च्छति ।

धूम्रकः—महाराज, समाश्वसिहि समाश्वसिहि ।

प्रतिहारः—(प्रविश्य) देव, कश्चिद् द्वारमध्यास्ते ।

शुंभः—शीघ्रं प्रवेशय ।

(प्रतिहारोनिष्क्रम्य पुनस्तेनसह प्रविश्य । इतइतोभवान् ।

दूतः—(प्रविश्य) अयमयं शुंभस्तदेनमुपसरामि । इतितथाकरोति ।

शुंभः—(विलोक्य) ननु को भवान् ।

दूतः—अहमस्मि भैरवो नाम देवीदूतः ।

शुंभः—किमाह देवी ।

दूतः—पत्रमुद्घाटय श्लोकं पठति ।

भो भोः शुंभ, निशुंभ, सन्दिशतिवांसिंहस्थिताचण्डिका स्वाराज्यं लभतां शचीपति रथो सर्वाधिकारान्सुराः ।

संग्रामात् **अभितः** सर्वतः **मनोरथोपि** त्रोटित इत्यनुषङ्गः । चण्डमुण्डावेवहताविति भावः । **संभावयसि** कथयसीत्यर्थः । **विरमति** शोकातिशयाद्विरामः । **मूर्च्छति** मोहंगच्छति, **प्रतिहारो** द्वारपालः **द्वारमध्यास्ते** द्वारेतिष्ठति । **वांयुवां सिंह स्थितेति** विशेषण मयुक्तंदृष्टता ध्वननाय । **चण्डिकेति** [illegible] **सन्दिशती**

पातालंद्रुतमेतमद्ययुवयोर्यज्जीवनाय स्पृहा ।
सन्देहादथचेन्नियोद्धुमनसौशीघ्रंसमागच्छतम् ॥ ३ ॥

शुंभः—(श्रुत्वा) विरूप, गृह्यता मयं दुष्टदूतः ।

विरूपः—देव, नायं नयः सौजन्यं च यद्दूतनिग्रहः ।

शुंभः—धिङ्मूर्ख, किंनामसौजन्यं, न जानासि माम ।

असज्जनानामुदयाद्रिरस्मिसतांजनानामथपर्वतोऽस्तः ।
न्यायेतराचारविधिप्रवृत्तासुराग्रगण्यःसुहृदां शरण्यः ॥ ४ ॥

दूतः—(श्रुत्वा) अरेरेनिर्मर्याद, अलमनयावहुविकत्थनया । सत्यंब्रवीमि ।

नैवेदृशोभगवतीनिदेशो मम वर्तते ।
अन्यथा त्वामहत्वाजौ दूतोऽयं न गतोभवेत् ॥ ५ ॥

शुंभः—क्रोधेन स्वयं ग्रहीतुमिच्छति ।

दूतः—अन्तर्हितोभवति ।

शुंभः—विरूप, मदाज्ञया शीघ्रतया—

सर्वं निवेद्य समराङ्गण वृत्त मेतत्
देव्या नियोद्धुमधुनातिवलोनिशुंभः ।

तिभावः । **शचीपतिरिन्द्रः एतं** गच्छतम्, **जीवनायस्पृहा** स्पृहेरीप्सित इति चतुर्थी । **सन्देहात्** स्वपराजये संशयं मत्वा **नियोद्धुमनसौ** युद्धकामौ, तुं काममनसोरपीतिमकारलोपः । **उदयाद्रि**रुदयाचलः **पर्वतोऽस्तो**ऽस्ताचलः । **न्यायेतरेति** । नीतिविरुद्धमाचरतामहमग्रणीरित्यर्थः । **निदेश** आज्ञा, **आजौ**-युद्धे **अन्तर्हितः** तिरोहितः **देव्येति** सहार्थेतृतीया । **नियोद्धं** युद्धंकर्तुं **शक्ति**-

आदिश्यतां नखरतःखरमुग्रदंष्ट्रं
सिंहं निहंतुमतुलः स च रक्तबीजः ॥ ६ ॥

विरूपः—यथाज्ञापयति देवः । इतिनिष्क्रान्तः ।

शुंभः—अहमपि यथोचितं कर्तुं गच्छामीतिनिष्क्रान्तः ।

(ततः प्रविशति दीर्घजानुः ।)

दीर्घ०—(समन्तादवलोक्य) अहह—

समस्तदानवकुलेयन्म्लानत्वमुपागतम् ।
तन्मन्येदानवानांश्रीर्गन्तुमिच्छतिसम्प्रति ॥ ७ ॥

सत्यं दुर्निवारा भगवती भवितव्यता । इदानीमेव देव्या दूत द्वारेणोक्तंयत्—हे शुंभ, सम्प्रत्यपि न किंचिद्गतम् । भवान् सकुटुम्बः पातालमधिवसतु । परन्तु स दुर्णयः तृणवदभिमत जगत्त्रयः प्रेरितवानेववत्सौ निशुंभरक्तबीजावभियोद्धुम् । न जाने किं भविष्यति । (अग्रेदृष्ट्वा) कथं संग्रामवार्ता मन्वेष्टुं प्रेरितेषु वक्रमुखः । (प्रविश्य)

वक्रमुखः—आर्य दीर्घजानो, क भवता गम्यते ।

दीर्घ०— वत्स, संग्रामवार्तान्वेषणाय शुंभसमीपेगच्छामि ।

वक्रमुखः—क सम्प्रति शुंभः ।

दीर्घ०—(शान्तंपापं प्रतिहतममंगलम् ।)

वत्स, कुतोभवानागतः ।

श्यता मनुज्ञायताम् । **म्लानत्वं** मन्दता **अभियोद्धुं** युद्धंकर्तुं **अन्वेष्टुं** ज्ञातुं **अमङ्गलम्** अशुभं **प्रतिहतं** नष्टंभवतु **अभिधाय** निवेद्य **ननेति** । शोकेस्खल-

वक्र०—शुंभाय संग्रामवार्तामभिधाय समागतोऽस्मि ।

दीर्घ०—का संग्रामवार्ता ।

वक्र०—महावीरयो र्निशुंभरक्तवीजयो रित्यर्धोक्ते विरमति ।

दीर्घ०—वक्रमुख, सत्यं वक्रमुखोसि । स्पष्टं कथय, किं निशुंभरक्त वीजयो र्विजयम् ।

वक्र०—ननननहिववववधम् ।

दीर्घ०—हा निशुंभरक्तवीजा वितिमूर्च्छति ।

वक्र०—आर्य, समाश्वसिहि समाश्वसिहि ।

दीर्घ०—वज्रपातसमानं समाचारमेनं श्रुत्वा कथमासीच्छुम्भः ।

वक्र०—इदमाकर्ण्य वारंवारंमूर्च्छां प्राप्तः कथंचिन्मन्त्रिभिराश्वासितः ।

दीर्घ०—मन्त्रिभिराश्वस्यमानः किमाह शुंभः ।

वक्र०—शुंभः सोद्वेगमाह—हे मन्त्रिणः ।

सर्वशत्रुजयाशाया भारो यत्र प्ररोपितः ।
तयोरपिविनाशेऽत्र किंपाश्वस्य भविष्यति ॥ ८ ॥

दीर्घ०—सत्यमाह शुंभः । ततस्ततः ।

नम् । **हा** शोच्याविल्यर्थः । **मूर्च्छांप्राप्तः** मोहमुपगतः । अनेन करुणरसः प्रोक्तः । यदाहभरतः—'मूर्च्छाप्रलापैरुदनैः करुणाभिनयोभवेत् ॥ **कथंचि**दतियत्नेन, कथंचियत्नवाद्योरितिविश्वः **सोद्वेगं,** उद्वेगश्चात्रेष्टवियोगात् । यदाहभरतः—इष्टजनस्यवियोगादुद्वेगोविभवनाशाच्च ॥ **यत्र** ययोः **प्ररोपितो** निहित आसीदितिशेषः

वक्र०—ततो मन्त्रिणः प्राहुः । देव, कः पुनरिह प्रतीकारः । शुंभः प्राह । अस्तमिता सम्प्रति प्रतीकारकथा ।

दीर्घ०—सैषा परमा सीमा शोकानुबन्धस्य । ततस्ततः ।

वक्र०—ततो वारंवारं निःश्वस्य, हा भ्रातः सकलदानवकुलावलम्ब, निर्विलम्बमदाज्ञापालनैकनिपुण, सकलगुणनिधे, मद्विजय स्तम्भ, निशुम्भ ।

सर्वदा सर्वकार्येषु त्वमासीर्मदनुव्रजः ।
किमग्रं मामकृत्वा ते परलोकगतं मतम् ॥ ९ ॥

अहहगरीयान्कालः । अश्रुतमपिश्रावयति अदृष्टमपिदर्शयति ।

निशम्य समरे शक्रः यस्यते विक्रमं सदा ।
चकम्पे क्षुभितोभूत्वा स्त्री त्वा मत्यरणेऽहनत् ॥१०॥

भ्रातः शुंभो जीवतीति मैवं मंस्थाः । किन्तु—

इमां यमालयं नीत्वा दुष्टदेवीं त्वदन्तिके ।
आगच्छामि विलम्बो य स्तं मम त्वं क्षमस्व वै । ११॥

दीर्घ०—(स्वगतम्) अहो, अद्यापि शुंभस्य जयाशा ।

(प्रकाशम्) वक्रमुख, शुंभो जेष्यतीति कः प्रत्ययः ।

तयोरपि निशुंभरक्तवीजयोः **अस्तमिता** लुप्तप्राया, **आसीरस्भुविलङ्** **अनुव्रजः** व्रजगतौ पचाद्यच् । **ते** तव **गतं** गमनं भावेक्तः । **मत**मभीष्टमासीत्। **निशम्य** श्रुत्वैव न पुनःदृष्ट्वा **शक्र** इन्द्रः **इमां** दुष्टदेवीं, यमालयं नीत्वा, **त्वदन्तिके आगच्छामीति** प्रमादावस्था । 'जायावर्जं समस्तस्य याम्यः पन्था

यांचण्डश्चैवमुण्डश्च रक्तवीजोपि नाजयत् ।
महारथीनिशुंभोऽथशुंभोप्येतां कथंजयेत् ॥ १२ ॥

वक्र०—एवमेव ।

दीर्घ०—सम्प्रति किमारम्भः शुंभः ।

वक्र०—इदानीमेवसंग्रामाभिलाषेण,महतारोषेण, विपुलक्रोधैः सकलयोधैः समं संग्राम भूमिंगतवान् ।

दीर्घ०—तदावाभ्यामपि शीघ्रमेव गत्वा शुंभपार्श्ववर्तिभ्यां भवितव्यम । इत्युभावपि निष्क्रान्तौ ।

इतिषष्ठोङ्कः ।

विभिद्यते, इतिस्मृतेः संगमासंभवात् **स्वगतमिति** । 'सर्वश्राव्यं प्रकाशं स्यादश्राव्य स्वगतं मत मितिदशरूपकम् । **प्रत्ययः** विश्वासः **यां** देवीं चण्डमुण्डरक्तवीजनिशुंभादयोनजेतुमशक्नुवन ।**तामेतां**शुंभोजेष्यतीतिकोनिश्चयइतिभावः । **इति**दुर्गाभ्युदयनाटक संकेते षष्ठाङ्कविवरणम् ॥



अथसप्तमोऽङ्कः ।

(ततः प्रविशति गन्धर्वयुगल माकाशयानेन)

एकः—सखे, स्पृहणीय, वहोः कालात्परमनेन नभोमार्गेण संचरावहे ।

द्वितीयः—सखे दर्शनीय, एवमेव ।

दर्शनीयः—अहह—महावीरस्यशुंभस्य सिंहनादं श्रुत्वाविचित्रभंग्या पलायन्ते देवीगणाः ।

स्पृहणीयः—(विलोक्य) सखे पश्य पश्य, इयमागताभगवत्यपि ।

दर्शनीयः—शृणुवो देवीं दृष्ट्वा किं वदति शुंभः ।

(श्रुतिमभिनीय) किमेवमाह ।

आ दुष्टे, त्रिदशसहायताप्रहृष्टे,
ये नीताः क्षयमसुरास्त्वयाद्ययावत् ।
अद्य त्वां नयति समक्ष माशु तेषा
मेषा मे वहुतरतीक्ष्णखड्गधारा ॥ १ ॥

स्पृहणीयः—देवी पुनरेवमाह—

अलीकवाचाल, वृथातिगर्वित,
त्वमात्थयत्सर्व महं विलोकये ।
गृहाण शस्त्रं निगृहाण वाङ्मयं,
जहीहि मानं जहि मां पुरः स्थिताम् ॥ २ ॥

स्पृहणीय-दर्शनीयेति-गन्धर्वयोर्नाम । **विचित्रभंग्या** रीत्या, **शृणुवः** श्रोतुमिच्छावः **श्रुतिमभिनीय**कर्णंदत्वा, **आः** क्रोधे, **क्षयं** नाशं **अद्ययावत्** अद्यावधि, **नयति** नेष्यतीत्यर्थः। शीघ्रताद्योतनायवर्तमानप्रयोगः। [illegible]

स्पृहणीय:—शुंभः सविस्मयमाह—

अहो प्रभावः कालस्य यन्मया योद्धुकाम्यया ।
योषित्तिष्ठति संग्रामे सार्धमेभिः प्रलापनैः ॥ ३ ॥

दर्शनीय:—विपक्षदुर्वचनत्रुटयमानमानसा भगवतीदमाह—

अरेरे दानवापसद, अलमलं वहु प्रलप्य । यत्खलु—

मनुष्यत्वस्य गर्वेण स्त्रीत्वं त्वं मन्यसे तृणम् ।
तदहं युद्धतुलया निर्णयाम्यत्र यद्गुरु ॥ ४ ॥

अपिच रे, दानवकीट ।

सकलभुवनजेता, सर्वदैतेयनेता,
तृणमिव परिभूता यस्य गर्वेण सर्वे ।
रणशिरसि निजघ्ने स स्त्रिया नो मया किम्
महिषसुरविरोधी यत्त्वमेवं ब्रवीषि ॥ ५ ॥

स्पृहणीय:—(कर्णं दत्वा) किमेवं वदति शुंभः ।

आ दुष्टे, कथं महिषासुर इव हीनसत्वो दानवः शुंभः । आम्, अतएव स्वप्रतापलवदुर्विदग्धा त्वं मत्तः संग्राम मिच्छसि तदियं न भवसि ।

विलोकये विलोकयिष्ये **अहो** आश्चर्यं, कालस्य समयस्य प्रभाव आश्चर्यजनक इत्यर्थः । **यन्मयापि** जितत्रिभुवनेनापि **सार्धं** सह **योद्धु काम्यया** युद्धं कर्तु मिच्छया, **योषित्** स्त्री, न तु कश्चिद्वीरः । सापि **संग्रामे** वीरभूमौनान्यत्र, तत्राप्येभिः मम साक्षाच्छ्रूयमाणैः **प्रलापनै** दुर्वचनैः । **मनुष्यत्वस्यगर्वेण** मनुष्य जात्यभिमानेन **स्त्रीत्वं** स्त्रीजाति **यत्** स्त्रीत्वं मनुष्यत्वंवा, **सर्वे** लोकाः **परिभूताः** तिरस्कृताः **दुर्विदग्धा** मत्ता, **मत्तो** मया, **न भवसि** न जीवसि ।

दर्शनीयः—(सविषादम्) कथमुपक्रान्तमेव शुंभेन ।

स्पृहणीयः—(सहर्षम्) कथं देव्यापि प्रत्युपक्रान्तमेव ।

दर्शनीयः—सखे, सम्प्रति सावधानमवलोकय, तुलाधिरोहः खल्वयं वीरलक्ष्म्या यन्नाम देवीशुंभयोः संग्राम इति ॥

स्पृहणीयः—कोऽत्रसन्देहः ।

दर्शनीयः—(सकौतुकम्) वयस्य, पश्य तावत् ।

भगवतीशुंभयोः सिंहनादं श्रुत्वा समागता नेक मातंग कुरंगहर्यक्षऋक्षशृगालकोलकोलाहलाहूतभूतवेतालचक्रवालकण्ठनालप्रकटीभवद्घोरचीत्कारचमत्कारयुक्तेयं समर भूमिरवलोक्यते । तयोरेवसक्रोधपादन्यासप्रभूतभूकम्पेन च सालरसालप्रियालतमालहिन्तालसुरदारकोविदारकर्णिकारनिम्बकदम्बबकुलनिचुलखर्जूरवीजपूरमधूकबन्धूककपित्थाश्वत्थवृक्षाः परिपतन्ति ।

स्पृहणीयः—वयस्य, इतोऽपि पश्य ।

शुंभमुक्तानिशस्त्राणि देवीनयतिरिक्तताम् ।
पौरुषं पुरुषस्येव नियतिः प्रतिपन्थिणी ॥ ६ ॥

अपिच—यानि दिव्यानि शस्त्राणि दुर्गा दुर्गतिहारिणी ।
मुञ्चते दानवो भिन्ते तान्येव सहसा रुषा ॥ ७ ॥

दर्शनीयः—सखे, सखेदोहमालोकयामि ।

समं समंततो व्योम बाणवृष्ट्यान्धकारितम् ।
कृत्वा सिंहस्थितां देवीमाच्छादयतिदानवः ॥ ८ ॥

वराहः सूकरो घृष्टिः **कोल**इत्यमरः। एतेषां कोलाहलेनाहूता ये भूतवेताला स्तेषां **चक्र** वालामण्डलानि। चक्रवालंतु मण्डलमित्यमरः। तेषांकण्ठनालेभ्यः प्रकटीभवद्घोरचीत्कारेण चमत्कारयुक्तेत्यर्थः । **सालादयो वृक्षभेदाः** । परिपतन्ति—रणभूमावितिशेषः ।

स्पृहणीयः— सखे, कृतं विषादेन । पश्य—

देव्या कुपितया शीघ्रमुत्प्लुत्य त्रिदशद्विषः ।
हस्तलाघवतो बाणासनं छिन्नं पतत्यदः ॥ ९ ॥

किंच—छिन्ने धनुषि दैत्येन या शक्तिः समुपाददे ।
देव्याचक्रेणसाप्येवं छिन्नभिन्नत्व मापिता ॥ १० ॥

दर्शनीयः— वयस्य, महद्विषमं पश्यामि ।

छिन्नशक्तिर्महाबाहू राहुःचन्द्रकलामिव ।
देवीमाक्रामतिक्रोधा दैत्ययोद्धा समन्ततः ॥ ११ ॥

स्पृहणीयः—किमत्र वैषम्यम् । पश्य—

शुंभस्य सारथिं हत्वा रथ्यानपि पतत्रिणः ।
तृणवत्समदेवैते देव्यास्तूणीरमाययुः ॥ १२ ॥

अपिच—उत्प्लुत्य सहसा देव्या तलेनोरसिताड़ितः ।
भूमौ निपतितः शुंभः समाश्वसिति कृच्छ्रतः ॥ १३ ॥

दर्शनीयः—अहह दारुण मुपस्थितम् ।

दनुजोह्ययमाश्वस्य नेत्रे निष्कास्यमुष्टिना ।
प्रहर्तुं हृदये देव्या लघूत्थाय पलायते ॥ १४ ॥

रिक्तां विफलतां **नयति** प्रापयति **नियति** र्भाग्यम्, **सहसा** शीघ्रमेव, **रुषा** क्रोधेन, **व्योमा**काशम्. **दानवः** शुंभः, **त्रिदशद्विषः** शुंभस्य, **बाणासनं** धनुः **अद**इत्यंगुल्यानिर्देशः । **शक्तिः** शस्त्रविशेषः, **समुपाददे** जगृहे **आपिता** प्रापिता नीतेत्यर्थः ।**क्रोधात्** रोषात, 'प्रतिकूलेषुतैक्ष्ण्यस्य प्रकर्षःक्रोधइष्यते ।**रथ्यान** श्वान, **पतत्रिणो** बाणाः, **समं** युगपत, **तलेन** करतलेन, **उरसि** वक्षसि **हृदये** वक्षः स्थले 'हृदयं चित्तवक्षसोरितिनानार्थः । **लघु** शीघ्रं, [illegible]

स्पृहणीयः—(किमत्रदारुणम्) पश्यभगवतीसामर्थ्यम् ।

उत्पत्य गगनं देवी केशेष्वाकृष्यनिष्ठुरम् ।
समरं कुरुते घोरं निराधारा सुरारिणा ॥ १५ ॥

(ऊर्ध्वमवलोक्य) कथमितस्ततो नभस्तलादपक्रामन्ति वैमानिकाः । (पुनर्विभाव्य) अहो, सकलभीतिकरः समरः प्रवृत्तो देव्यसुरयोः । इत्यपसृत्यासाते ।

दर्शनीयः—सखे, भयानकमद्भुतं च वर्तते ।

उत्पात्य भ्रामयित्वा च बलेन धरणीतले ।
क्षिप्तोदेव्या स्थितोमध्ये देवीमेव कटत्ययम् ॥ १६ ॥

स्पृहणीयः—किमप्यस्तु । तथापि ।

देव्याः सम्प्रति जेतव्यं मर्तव्यं विबुधद्विषः ।
मुष्टियुद्धमिदं मन्ये निर्धारयति सर्वथा ॥ १७ ॥

यतोहि ।

यां मुष्टि मेष भगवत्युरसि प्रदत्ते
सा जायते तदुपगम्य मृणालमृद्वी ।
देवी तु यां प्रतिददात्युरसि स्वशत्रोः
सा त्रोटयत्यतिदृढानपि मर्मसन्धीन् ॥ १८ ॥

दर्शनीयः—एवमेतत् ।

यत्स यत्नेन कुरुते बलेन विपुलेन च ।
दृश्यते प्रतिकुर्वन्ती देवी तदपरिश्रमम् ॥ १९ ॥

निष्ठुरं निर्दयं यथास्यात्तथेत्यर्थः । **सुरारिणे**तिसहार्थेतृतीया । **अपक्रामं**त्यपसर्पन्ति । **आसाते** तिष्ठतः । **मध्ये**मध्यभागएवस्थितः सन् **अयं** शुंभः **कटत्या** [illegible]ता । **जेतव्यं** [illegible] **मर्तव्यं** [illegible] **यां मुष्टिमिति** । [illegible]

(नेपथ्ये) अयि भगवति देवि।

हन्तुं क्षणेन शक्तासि किं क्रीडसि दुरात्मना।
कुर्वस्मत्कामनापूर्तिं कीर्तिं च भुवनत्रये॥ २०॥

उभौ—नूनमेते दिवौकसो भगवतीं त्वरयन्ति।

(पुनः सहर्षविषादम्) कष्टं भोः कष्टम्।

प्रसूनास्तीर्णतल्पेयोऽशेतानल्पेऽसुरेश्वरः।
क्षितौ शेते स कीर्णोयं विवर्णोधूलिधूसरः॥ २१॥

(सकरुणम्) हा, महासत्व, मानरथाधिरूढ, प्रौढबाहुशालिन्, विकटारम्भ, शुम्भ, पर्यवसितोऽसि।

स्पृहणीयः—सखे, पश्य, सम्प्रति हि।

शुंभपातादियं क्षोणिः विशीर्णभावमागता।
धार्यतेऽतिप्रयासेन शेषेण फणमण्डलैः॥ २२॥

(आकाशे पुष्पवृष्ट्यनन्तरं) दुन्दुभिध्वनिर्मंगलगीतिश्च।

दर्शनीयः—तदद्यैवशचीपतिः स्वाराज्येन संगमिष्यति।

स्पृहणीयः—अथकिम्।

दर्शनीयः—तदागच्छ, आवामपि गृहे गत्वा सज्जीभूय महोत्सवसंविभागिनौ भवावः। इति परिक्रामन्तौ सर्वतो विलोक्य (परस्परम्) सखे, पश्य पश्य,

---

न्मुष्टिशब्दस्य क्लीबत्वं पुस्त्वंच **एष** शुम्भः तदुर **उपगम्य** प्राप्य, **एवमेतत्** यद्ब्रवीषि तत्सत्यमेवेत्यर्थः। कुतइत्याह—**यदिति।** यत्कर्म स शुंभः। **अपरिश्रमं** कुतुकादेवेत्यर्थः। **शक्तासि** समर्थासि, **दिवौकसो**देवाः **सहर्षविषादमिति।** दुष्टवधाद्धर्षः। भूपतितावस्थादर्शनाद्विषादः। **यः** शुंभः **अशेत** स्वपितिस्म। **सएवा**-[illegible]**क्षितौकीर्णः** पतितावस्थो ... **अयमशितोसि** मृतोऽसि **शचीपतिः**इन्द्रः।

स्तोत्र

हते शुंभे दुरारम्भे प्रसन्नमभवन्नभः ।
सर्वमेतत् जगत् किंच स्वास्थ्यमद्यप्रपद्यते ॥ २३ ॥

इतिनिष्क्रान्तौ ॥

(ततः प्रविशति सर्वदेवोपेत इन्द्रः)

इन्द्रः—(समीपमुपसृत्य) प्रणिपत्य च ।

जय देवि, महेशसेविते, जय जय दक्षसुते पतिव्रते ।
जय माहिषदेहशायिनि, जय जय रक्तकरक्तपायिनि ॥२४॥

जय चण्डविनाशकारिणि, जयजय मुण्डशरीरदारिणि ।
जय दानवकालयामिनि, जयजय शंकरदिव्यभामिनि ॥२५॥

जय कालि, कपालिमण्डने, जयजय शुंभनिशुंभखण्डने ।
जय भक्तजनानुकम्पने, जयजय पार्वति, दिव्यदर्शने ॥२६॥

देवी—(विलोक्य) अये, सकलसुरसमेतः पुरुहूतः । शतक्रतो, इदमासनमास्यताम् । सर्वे इन्द्रमनूपविशन्ति ।

इन्द्रः—मातः सकलारिव्रातः आसीन्निहतः प्रसीद सम्प्रति प्रसीद ।

देवी—देवराज, शृणोतु तावत् ।

पुरासुराणांयत्कार्यं कर्तुं व्यवसितं मया ।
तद्धि सिद्धिमनुप्राप्तं पुण्यै रेव भवादृशाम् ॥ २७ ॥

स्वाराज्येन स्वर्गाधिपत्येन, **सङ्गमिष्यति** सङ्गमं करिष्यति । **महोत्सवसंविभागिनौ** महोत्सवेसम्मिलितौ । **दुरारम्भे** दुर्व्यारे । **नभो** व्योम **प्रसन्नं** निर्मलम् । **सर्वमेतज्जगत** स्थावरजङ्गमात्मकं **स्वास्थ्यं**रमणीयतां **रक्तको** रक्तबीजः संज्ञायांकन । **कालयामिनि** कालरात्रि, **सकलारिव्रातः** सम्पूर्णशत्रु-

स्तोत्र

इन्द्रः—(पादयोः पतन्) मातर्दुर्गे, येषां रक्षापक्षपातिनी त्वमसि तेषां पुण्यवत्त्वेकः सन्देहः । किंकिंवर्णयामि ।

शूलं त्वदीयं रिपुनाशमूलम्
खड्गस्त्वदीयः परहाऽद्वितीयः ।
गदा द्विषद्भिन्नमदा त्वदीया
नाशं व्यधा दाशु महासुराणाम् ॥ २८ ॥

किंच—

आश्चर्यमेतदति मे हृदये त्वमेका
वासं करोष्यसुरनिर्जरयोषितां यत् ।
दुःखं सुखं च जनयन्त्यतिकौतुकं च
शौर्या दतीवंविनयादथरम्यतायाः ॥ २९ ॥

अपिच—

अब्धिं सुततुमपि वश्मि करावलम्बः
पाणौ विधातुमिह कामय इन्दुमम्ब ।
वांच्छामि लंघयितुमस्मिसुवर्णशैलम्
यत्त्वद्बलं गदितु मुद्यममद्य कुर्वे ॥ ३० ॥

यतोहि—

यन्महेशो रमेशोपि कर्तुं शक्नोति नो विधिः ।
तत्त्वया ह्यप्रयासेन कृतं किन्तेद्य वर्ण्यते ॥ ३१ ॥

समूहः । **प्रसीद** प्रसन्नाभव । **पुरा** पूर्वं **व्यवसितं** प्रतिज्ञातं **पुण्यवत्त्वे** पुण्यशालित्वे, **परहा**शत्रुघातकः । **असुरा** दैत्या **निर्जरा** देवाः **योषितः** स्त्रियः एतेषां सर्वेषां हृदये त्वं वससि । **वश्मि** इच्छामि **इह** भूमिस्थः

रजः सत्वतमोद्वारासृष्टिस्थितिलयास्त्वया ।
क्रियन्तेऽथच साध्यन्ते नोऽवतीर्य मनोरथाः ॥ ३२ ॥

किंवहुनोक्तेन—

इतिहासविदां नेदं हृदयादपयास्यति ।
संहृत्य दैत्यनिचयंयत्कृतं चरितंत्वया ॥ ३३ ॥

देवी—(सहर्षप्रसादम्) दिवस्पते, किन्ते भूयः प्रियं करोमि ।

इन्द्रः—(साञ्जलिवन्धम्) मातरतः परमपिप्रियमस्ति ।

निःशोकीकल्पितेयं महिषमसुरराजं निहत्य त्रिलोकी
शुंभाद्यादानवा ये समजनिषत ते संपरायेहतास्ते ।
सर्वैर्देवैर्मयाप्ताः सकलहितकराः स्वाधिकाराःसमग्राः
दृष्टात्वं चाद्य साक्षात्प्रियमथकिमुयत्प्रार्थ्यतेत्वत्सकाशात् ॥३४

तथापीदमस्तुभरतवाक्यम् ।

विप्राणां वदनेषु वेदभगवानास्तां समस्तांशतः
त्वत्पादाम्बुजयोः समस्तसुखयोर्निर्व्याजभक्तिर्भवेत् ।
वाग्देव्यासममस्तुवास्तुनिसतांलोकाभिरामारमा
वृद्धिं यान्तु सुखानि सन्तु मतयो धर्मेनृणां सर्वदा ॥ ३५॥

पाणौहस्ते, **लंघयितुं** पद्भ्यामिति शेषः । **अप्रयासेन** कुतुकेनैव. **नोऽस्माकं मनोरथाः** कामाः । हृदयान्ना**पयास्यति** न विरंस्यति । **इदं**मितिचरितेन संवध्यते । **दिवस्पते** संज्ञायां षष्ठ्या अलुक् । **निःशोकील्पिता** शोकरहिता कृता. **इयं त्रिलोकी** 'अकारान्तोत्तरपदोद्विगुः स्त्रियामिष्टः। ये शुंभाद्यादानवाः **सम-**

अपिच—

सर्वेषांवचसांमणिर्विजयतांसादेववाणीसदा
कर्तुं कारयितुंयतन्तुकवयोनव्यानिकाव्यानि ते ।
नश्यन्तुव्यसनानिसन्तुसुखिनोभूदेवगोसेवकाः
राजारञ्जयतुप्रजाःप्रतिदिनंस्वातन्त्र्यलाभोत्सुकाः ॥३६॥

देवी—एवमस्तु । इति निष्क्रान्ताः सर्वे ।

इतिसप्तमोऽङ्कः ।

समाप्तमिदंदुर्गाभ्युदयनाटकम् ॥

जनिषत संजाताः **ते** सर्वभीत्यर्थः । **संपरायेयुद्धे ते** त्वया हतामारिताः । 'तेमेशब्दौनिपाते'ष्वितिवामनः । **सर्वैर्देवै**रितिसहार्थेतृतीया । प्रस्तावनानन्तरंनटवाक्याभावाद्भरतवाक्यमित्युक्तिः । भरतोनामनाट्यशास्त्रप्रणेतामुनिः । **वदनेषु** मुखेषु **आस्तां** विराजतां **समस्तसुखयोः** सकलसुखहेत्वोः सतां विदुषां **वास्तु** निगृहे,**वाग्देव्या**सरस्वत्यासह **रमा** लक्ष्मीरस्तु । निवसतु । **सर्वेषामिति** । मणिः शिरोमणिःसर्वभाषाजननीत्यर्थः । सालोकवेदप्रसिद्धा । **देववाणी** संस्कृतभाषा, व्यसनानि विपदः **स्वातन्त्र्यं**स्वराज्यं, **रञ्जयतु** स्वराज्यंदत्वा सुखयत्वित्यर्थः । **आभ्यांश्लोकाभ्यां**प्रशस्तिरुक्तायदाहभरतः **देवद्विजनृपादीनां प्रशस्तिः स्यात्प्रशंसनमिति** ॥ **इति** दुर्गाभ्युदयनाटकसंकेते सप्तमाङ्कविवरणम् ॥



❀ ग्रन्थकारपरिचयः ❀

गणाधीशं नमस्कृत्य मामकींनाममातरम् ।
पितरं मोक्षरामाह्वं मूलचन्द्रं च सोदरम् ॥ १ ॥
कुरुक्षेत्रमध्यवर्ति-रिटोलीग्रामवासिना ।
गौड़पण्डितवर्येणछज्जूरामेणशास्त्रिणा ॥ २ ॥
विद्वन्मनोविनोदाय स्वमनोरञ्जनायच ।
स्वकीयचरितात्किञ्चित्सारमादायलिख्यते ॥ ३ ॥

अस्ति खलु श्रुतिस्मृतीतिहासपुराणविदिते पवित्रकुरुक्षेत्र–जनपदे—शेखपुरा–लावला, नामकोग्रामः । तत्र सदाचारपरायणो भगवदत्रिगोत्रीयो गौड़पण्डित हरनाथशर्मा वभूव। तस्य फकीरचन्द्र विहारिलाल नामकौ द्वौ पुत्रौ वभूवतुः । श्री० पं० विहारीलालस्य कापि सन्ततिर्नाभूत् । श्री० पं० फकीरचन्द्रशर्मणो मोक्षराम-मनसाराम-नन्हुराम-शिवदत्त–नामानश्चत्वारः पुत्रावभूवुः । सर्वेषां गृहस्थजीवननिर्वाहःपूज्यगोमातृसेवयाकृषिकर्मणाचाभवत् । स्वगृहे सततं शतं गावो विद्यन्तेस्म । तासामेव कृपया श्री० पं० मोक्षरामशर्मणो धर्मपत्न्याः श्रीमती मामकीदेव्याः पवित्र कुक्षितः चत्वारः पुत्रा—मूलचन्द्र-छज्जूराम-नेकीराम-रामकृष्ण-नामानोयथाक्रममजायन्त । मम छज्जूरामशर्मणोजन्म तत्रैव ग्रामे १९५२ विक्रमाब्दे भवतिस्म । अष्टौ वर्षा मम वाल्यक्रीड़ायामेवगताः । यदास्माकं पितृव्यः पण्डितशिवदत्तशर्मा, व्याकरणशास्त्रमधीत्य काशीतो गृहमागतः । तदैव नवमेवर्षे मम शिक्षा प्रारम्भोऽभूत् । मम ज्येष्ठभ्राता पण्डित मूलचन्द्रशर्मापि, ततः पश्चादेव कर्मकाण्डस्य मर्मज्ञोविद्वान्भूत्वा गृहकार्ये लगतिस्म । तस्यैव प्रेम्णा साहाय्येन च मया सर्वं पठितम्। स्वकीयपितृव्यपण्डितशिरोमणि–शिवदत्तपादानांपार्श्वे —मयाऽमर

कोशः पठितः । ब्राह्मणोलीग्रामवास्तव्य–पण्डितपरमानन्दशास्त्रिणां पार्श्वे लघुकौमुदी तर्कसंग्रहौ पठितौ । सिद्धान्तकौमुदी महाभाष्य शेखर मंजूषा प्रभृतयो ग्रन्थाश्च गागरमल्लपाठशालाया ममृतसरसि पठिताः । ततो मया भिवानीनगरे-गत्वा पण्डितसीतारामशास्त्रिणां कृपया, पञ्चापप्रान्तीया-शास्त्रीपरीक्षा समुत्तीर्णा । कवित्वविषये मदीया प्रतिभा प्राक्तनसंस्कारवशादजायत, नातिप्रयासमपेक्षतेस्म । सत्यमाह—साहित्यावतारोमम्मटः 'कवित्वशक्तिः प्राक्तनसंस्कारविशेषः ॥ कवित्वेपि महान्भेदोयन्मयैवोच्यते—

सर्वः शास्त्राणि पठति करोति कवितामपि ।
कवितायाः परं सारं कश्चिद्विज्ञातुमर्हति ॥

यदाहंप्रथममेवजीन्दनगरे-सनातनधर्ममहाविद्यालये,पाठयितुमारब्धवान् । तदारभ्यैव—

ब्राह्मणस्य च देहोऽयं क्षुद्रकामायनेष्यते ।
परमात्मविचाराय प्रेत्यानन्तसुखाय च ॥

इति ज्ञात्वा प्रतिदिनं दुर्गापाठं शिवपूजनं च कर्तुं स्वमनसि प्रतिज्ञातवान् । तयोरेव कृपया मयि षट्शास्त्राध्यापनशक्तिर्ग्रन्थनिर्माणशक्तिश्चाविरभूत् । षट्शास्त्रेषुकठिनात्कठिनमपि यं कञ्चन ग्रंथ मादायपठामिस्म । स स्वयमेवलगतिस्म । श्रुतिरपिभगवत्याह—

यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिताह्यर्थाः प्रकाशन्ते महात्मनः ॥

कतिपयदिवसानामेव पश्चात् हृषीकेशवास्तव्य–पण्डितगंगास्वरूपब्रह्मचारिणा, महाभारतीयकथासमाप्तौ, एकं निखिलभारतीयविद्वत्सम्मेलनं सफीदमनगरे कृतम् । यत्र सहस्रं विद्वांसो जगद्गुरुशंकराचार्यप्रमुखाः समाययुः । [illegible] तत्र [illegible] । [illegible]

जगद्गुरुशंकराचार्यानुरोधेनचसर्वोच्चासनेऽहमेवतिष्ठामिस्म। यदासन स्मद्देशे म० म० गरुड़ध्वजशास्त्रिणः समलंकुर्वन्तिस्म । पंचविंशतिवर्षवयस्कं मां महासने स्थितं दृष्ट्वा केचित् पण्डितंमन्या 'गुणि षु नच लिंगं नच वयः' इत्यादिशास्त्रमजानन्तः चुक्रुधुर्यावत्तावत्सभायां व्याख्यानावसरः संप्राप्तः । सर्वप्रथमं जगद्गुरुशंकराचार्यानुरोधेनाहमेव षड्दर्शनविषयकं व्याख्यानमदाम्। तच्छ्रुत्वा जगद्गुरु शंकराचार्याः साधुवादपूर्वकं मह्यं—विद्यासागरपदवीं, रूप्यकशतं, दुशालं,चैकमदुः। तदामयेदमप्युक्तं यत्कोपि विद्वान् कस्मिन्नपिविषये शास्त्रार्थंकरोतु । परन्तुकश्चिदपिनोदतिष्ठत्। शास्त्रार्थकरणेममाती वाभ्यासोवर्तते । लाहौरप्रभृतिनगरेषु बहवः शास्त्रार्थाः कृता विजयश्च प्राप्तः । पुनश्चाहंमातापित्रोरनुरोधेन, सांभलीग्रामवास्तव्य श्री० प० भिद्धारामशर्मणः पुत्र्या श्रीमतीभक्तिदेव्या, समं विवाह मप्यकार्षम्। मम सिद्धान्त आसीत्—

असमापितविद्यस्य स्त्रीचिन्ता का मनस्विनः ।
अनाक्रम्य जगत्सर्वं नो सन्ध्यां भजते रविः ।

१९८१ विक्रमाब्दे सकुटुम्बोऽहं—शेखपुरालावलाग्रामात्संबंधं परित्यज्य पवित्रकुरुक्षेत्रमध्ये-रिटोलीग्रामे समागतवान् । वहिर्भूमिं क्रीत्वाग्राममध्येसुधाधवलं भवनमप्येकं कृतवान्। सर्वेदेशवासिनोमाम्।

यस्मिन्देशेवसेद्विद्वान् धर्मशास्त्रोपदेशकः ।
सोऽपिदेशोभवेत्पूतः किं पुन स्तस्यबान्धवाः ॥

इतिमत्वाराजानमिव सत्कुर्वन्ति । देवमिव पूजयन्ति ।
ममापि सर्वान्प्रत्येष उपदेशो भवति—

ग्रामेग्रामे पाठशाला, ग्रामेग्रामे च मन्दिरम् ।
ग्रामेग्रामे धर्मसभा, ग्रामेग्रामे कथाः शुभाः ॥

एकस्मिन्नखिलभारतीय-कविसम्मेलने सभापतिमहोदयो मां रामायण-महाभारत-भागवत-भगवद्गीता-सप्तशती-नाम्नां पवित्रग्रन्थानां विलक्षणार्थकरणार्थमनुरुरोध । मयापि तल्लक्षणमेव ग्रन्थपञ्चकस्यार्थः प्रत्यक्षरमेवंरीत्याकृतः ।

रामायणम् ।

रायं पुत्रांश्च पौत्रांश्च मानं मान्येषुसद्गतिम् ।
यद्ददाति स्वपाठिभ्यो न तस्मै रोचयेतकः ॥१॥

महाभारतम् ।

महा युद्धं वभूवात्र भारतं नाम भारते ।
रम यत्यखिलं लोकं तत्कथा मृतवर्षिणी ॥२॥

भागवतम् ।

भाति सर्वत्रशास्त्रेषु गण्यते श्रुतिसंनिभम् ।
वर्तते त्रिषु लोकेषु तरन्ति पाठिनोजनाः ॥३॥

भगवद्गीता ।

भवाब्धिमग्नोयांश्रुत्वा गच्छेत्पारं भवाम्बुधेः ।
वर्तते सात्र निजव द्गीता हरिमुखोगदूता ॥४॥

सप्तशती ।

सर्वं कामप्रदा भक्ता सज्जनोद्धारकारिणी ।
शङ्करी पाठमात्रेण ती व्रदुःख विद
पञ्चकमिदं श्रुत्वापरंप्रसन्नः सभापतिमहोदये
मनेक पुस्तकानिचार्पयत् ॥

एकदामयानिम्नलिखितं पद्यं कश्चित्पुस्त
तेधन्यास्तेमहात्मानः तेषांलोके